## ॥ अष्टमः सर्गः ॥

॥ श्रीगणेशाय नमः ॥

अथाद्भुतेनास्तनिमेषमुद्रमुन्निद्ररोमाञ्चममुं युवानम् ।
दृशा पपुस्ताः सुदृशः समस्ताः सुता च भीमस्य महीमघोनः ॥१॥

अनन्तरं ता अशेषा विशालाक्षः सा च भूमीन्द्रस्य भीमस्य पुत्री, आश्चर्यरसेन कृत्वा, अस्ता निमेषस्य मुद्रा निरोधो यत्र तदस्तनिमेषमुद्रं यथा स्यादेवममुं तरुणं नलं कण्टकिताङ्गयष्टिं दृशा पपुः, अतिहर्षाद् रोमाञ्चिताङ्गमेनमनिमेषया दृष्ट्या प्रथमं ताभिस्ताभिः सखीभिस्तदनु भूमीन्द्र भीमभुवा स सादरं दृष्ट इत्यर्थः। भीमस्य महीमघोनः सुतेति रूपविभूषणादिसामग्रीसौकर्यसूचनम् ॥१॥

कियच्चिरं दैवतभाषितानि निह्नोतुमेनं प्रभवन्तु नाम ।
पलालजालैः पिहितः स्वयं हि प्रकाशमासादयतीक्षुडिम्भः ॥२॥

ननु शक्रप्रसादाददृश्योऽभूत् तत्कथं तदा तत्र दृश्योऽभूदित्याह। खलु नूनं देववाक्यानि कियन्तमधिकं कालमेनं गोपायितुं पारयन्तु। हि यस्मात्। रसालपोतः पलालपुञ्जेनाच्छादितः सन्नात्मनैव प्रकटतां लभते। एवच्च तत्कृपिविधं विदितमेव। स्वेच्छयैव स प्रत्यक्षोऽभूत्। तस्य तु महत्त्वख्यापनार्थमियं सम्भावनोद्भावना यथा लोकेऽपि प्रसिद्धमुपाख्यानं —"सूर्यो भगवानुदयं कुर्वन् किं कुण्डिने-[1591-ट]-नाच्छाधते" इति [ ]। एवमेव चैतद्धीनोपमानमपि तन्महत्त्व — — — निष्ठत्वान्नात्र दूषणम् ॥२॥

अपाङ्गमप्याप दृशोर्न रश्मिर्नलस्य भैमीमभिलक्ष्य यावत् ।
स्मराशुगः सुभ्रुवि तावदस्यां प्रत्यङ्गमापुङ्खशिखं ममज्ज ॥३॥

नलस्य नेत्रयो रश्मिर्भैमीमनुसंधाय यावन्नेत्रान्तमपि न लेभे, तावत् कामबाणोऽस्यां सुन्दर्यां सर्वाङ्गेषु पुङ्खशिखं यावन्मग्नः। ईदृश एवास्य संविधानस्य समाचारः। दृशोरिति द्विवचनमतुल्या द्वाभ्यां दृग्भ्यां विस्फारमनोहराभ्यां दृश्यमानत्वात्। रश्मिरित्यनेन तेजोमात्रम् ॥३॥ *कंदर्पस्पर्धतयोर्द्वयोः विक्रमशक्तेः साम्यात्। अत्र द्वयोः साम्यं किं यदा सा तस्मिन्नलेऽनुरक्ता जाता। तदा सोऽपि तस्यां दमयन्त्यां वले प्रवृत्तः सानुरागो जातः। ईदृशात् विक्रमशक्तिसमत्वात् विक्रमशक्तिसाम्यमग्रेतनकाव्ये भावयिष्यति। अत एव एककालमुपचचारेत्यर्थः। *.8. om. कंदर्प्य ---- रेत्यर्थः।

यदक्रमं विक्रमशक्तिसाम्यादुपाचरद् द्वावपि पञ्चबाणः ।
कथं न वैमत्यममुष्य चक्रे शरैरनर्धार्धविभागभाग्भिः ॥४॥

यत्कारणाद् विक्रमशक्तेः समत्वात् पञ्चशरस्तौ द्वावप्यक्रममेककालमेवोपाचरत्, प्रतिचकार । तत्कारणादमुष्यानर्धार्धविभागभाग्भिः [1]शरैर्बाणैः कथं केन प्रकारेण वैमत्यं [2]विमतितामघटत्वं वा न चक्रे । इति काकुप्रयोगात् संशयप्रतीतिः । पञ्चशरा ह्यर्धार्धं विभजितुं न यान्ति । तेन च पञ्चभिः समविभागे भागे कस्मिन्नेव काले तौ प्रति- -कृतावित्यत्र विप्रतिपत्तिर्युक्ता, सा च कथं न जातेति वयं न जानीमहे इत्यर्थः । नार्धार्धं विभागं भजन्ते [3]अनर्धार्धविभागभाजस्तैः ॥४॥

तस्मिन्नलोऽसाविति सान्वरज्यत् क्षणं क्षणं क्वेह स इत्युदास्त ।
पुनः स्म तस्यां [4]वलतेऽस्य चित्तं दूत्यादनेनाथ पुनर्न्यवर्ति ॥५॥

तदेव साम्यमाह । असौ नल इति मत्वा सा [5]दमयन्ती तस्मिन् [6]नले क्षणमनुरक्ता जाता । स नल इह क्वेति मत्वा क्षणमुदासीनाभूत् । अस्य नलस्य चित्तं तस्यां पुनर्वलते स्म । प्रवृत्तं पुनश्च दूतभावेन शक्त्या निवर्तितम् ॥५॥

कयाचिदालोक्य नलं ललज्जे कयापि तद्भासि हृदा ममज्जे ।
तं [7]कापि मेने स्मरमेव कन्या भेजे मनोभूवशभूयमन्या ॥६॥

कापि कुलिना तं दृष्ट्वा लज्जिता । कयाप्यकुलीनया स्वान्तेन तस्य कान्त्यां मग्नं क्वचित् कन्या तं स्मरमाशङ्कतेति, तस्या अपि मनाग् मनोभूभावोऽभूदित्यर्थः । अन्या तरुणी कामवशवर्तिन्यभूत् । तं वीक्ष्येति दीपकम् । दूरमै[8]त्रीयमनुप्रासः ॥६॥ (-मैत्रीमनु-)

कस्त्वं कुतो वेति न शक्नुवत्यस्तं प्रष्टुमप्यप्रतिभातिभारात् ।
उत्तस्थुरभ्युत्थितिवाञ्छयैव निजासनान्नैकरसाः कृशाङ्ग्यः ॥७॥

प्रतिभा नवनवोल्लेखशालिनी (-न्मेष-) प्रज्ञा । तस्याः प्रतियोगिन्यप्रतिभा विस्मृतिभेद एव तस्या अतिभारादाधिक्यात् । कस्त्वमसि, कुतो वाऽऽगत, इति प्रष्टुमपि, न शक्नुवत्योऽनेकरसा अनेकभावा इति तन्वङ्ग्यः स्वासनादुत्थिताः । उत्प्रेक्ष्यते । अभ्युत्थानाभिलाषेणेव ।

तत्त्वतस्तु अप्रतिभानमेवासनत्याग-[159 b]-हेतुः । नैकरसा अनेकभावा इति । नैकशब्दे समासेऽपि नाक्षरविपर्ययः । निजासनादित्यत्र वीप्सा गम्या ॥७॥

---

1. B. om. शरैर्बाणैः 2. B. om. विमतितामघटत्वं वा. 3. B. नार्धा- 4. B. Bl. चलते. 5. B. om. दमयन्ती. 6. B. om. नले. 7. B. चापि. 8. B. -मैत्रीमनु-

स्वाच्छन्द्यमानन्दपरम्पराणां भैमी तमालोक्य किमप्यवाप ।
महार्घ्यं निर्झरिणीव वारामासाद्य धाराधरकेलिकालम् ॥८॥

भैमी तं दृष्ट्वा हर्षकन्दलीनां किमप्यनिर्वचनीयं स्वैरभावं लेभे। वर्षाकालं प्राप्य नदीजलानां महान्तं रयमोघमिव धाराधरा मेघास्तेषां केलिकालो वर्षाः ॥८॥

तत्रैव मग्ना यदपश्यदग्रे नास्या दृगस्याङ्गमथास्यदन्यत् ।
नाशास्यदस्यै यदि बुद्धिधारां विच्छिद्य विच्छिद्य चिरान्निमेषः ॥९॥

अस्या भैम्या दृग् यदङ्गमवयवमग्रे प्रथममपश्यत्, तस्मिन्नेव चारुत्वलोभात् मग्ना सती, अस्य नलस्यान्यदङ्गं नाथास्यन्नाग्रहीष्यत्। यदि निमेषोऽस्यै बुद्धेर्धारां नैरन्तर्यं विच्छिद्य विच्छिद्य खण्डं खण्डं नाशास्यन्न व्यतरिष्यत्। कथं योऽसौ निमेषो विलम्ब्य चिराद् विलम्बानन्तरं यन्निमेषणमित्यर्थः ॥९॥

दृशापि सालिङ्गितमङ्गमस्य जग्राह नाङ्गावगताङ्गहर्षैः ।
अङ्गान्तरेऽनन्तरमीक्षिते तु निवृत्य सस्मार न पूर्वदृष्टम् ॥१०॥

सा भैमी अस्य नलस्याङ्गं दृशा संस्पृष्टमपि प्रथमानुभूतावयवप्रमोदैः कृत्वा न सम्यगादृदे। अन्यस्मिन्नवयवे पश्चाद् दृष्टे सति, पुनर्वलित्वा प्रथमेक्षितं नास्मरदित्यङ्गानामुत्तरोत्तर-चारुत्वकथनम् ॥१०॥

हित्वैकमस्यापघनं विशन्ती तद् दृष्टिरङ्गान्तरभुक्तिसीमाम् ।
चिरं चकारोभयलाभलोभात् स्वभावलोला गतमागतं च ॥११॥

तस्या दृष्टिरस्य नलस्यैकमपघनमङ्गं विहायापरावयवभागावधिं सञ्चरन्ती सती, सहज-लोलत्वादुभयाङ्गप्राप्तिगार्ध्यात् चिरं गतागतमाचरदिति भ्रान्तिः ॥११॥

निरीक्षितं साङ्गमवीक्षितं च दृशा पिबन्ती रभसेन तस्य ।
समानमानन्दमियं दधाना विवेद भेदं न विदर्भसुभ्रूः ॥१२॥

सेयं भैमी तस्य निरीक्षितमवीक्षितं चाङ्गं दृशा कृत्वा रभसेन पिबन्ती सती, विशेषं नाज्ञा-सीत्। यतस्तुल्यं प्रमोदं वहन्ती समानमुभयाङ्गदर्शने ॥१२॥

सूक्ष्मे घने नैषधकेशपाशे निपत्य निष्पन्दतरीभवद्भ्याम् ।
तस्यानुबन्धं न विमोच्य गन्तुमपारि तल्लोचनखञ्जनाभ्याम् ॥१३॥

तस्या लोचनाभ्यामेव खञ्जनाभ्यां सूक्ष्मे तनावनुपलक्ष्ये घने निरन्तरेऽच्छिद्रे ·वा नैषधस्य नलसृष्टस्य केशानामस्थपुच्छज्ञाना पाशे वधोपकरणे वस्तुनि निपत्य [160·a]

दूरात्पतनं कृत्वा निष्पन्दतरीभवद्भ्यां सद्भ्यां तस्य केशपाशस्यानुबन्धमितस्ततो बन्धनं मोचयित्वा गन्तुमुत्पतितुं नापारि, न शकितम् । ईदृशी खल्वियं भ्रान्तिः ।

नत्त्वतस्तु सूक्ष्मे स्थूलेतरे, घने सान्द्रे, नैषधस्य केशपाशे कचकलापे लगित्वा निष्पन्दतरीभवद्भ्यां तस्याः प्रशस्यलोचनाभ्यां तस्यानुबन्धं संसर्गं शाक्षिण्यं त्याजयित्वा गन्तुं न शकितमिति तस्य मनोहारित्वकथनम् । प्रकृष्टो निष्पन्दो निष्पन्दतरः । सुनिश्चलः । अनिष्पन्दतरो निष्पन्दतरो भवन्, निष्पन्दतरीभवन् । ततो द्वित्वम् । नलकचकलापपक्षे सूक्ष्मत्वमवयवभूतकेशस्थं, न तु कलापस्थम् । तथा सति ह्यनिष्टार्थापत्तिः स्यात् । तस्य हि सूक्ष्मेतरत्वमेव पूज्यम् ॥१३॥

भूलोकभर्तुर्मुखपाणिपादपद्मैः परीरम्भमवाप्य तस्य ।
दृगस्य सुदृष्टिसरोजराजिश्चिरं न तत्याज सगन्धबन्धम् ॥१४॥

नलस्यास्य करचरणसरोजैः सहालिङ्गनं लब्ध्वा भैम्या दृष्टिरेव कमलमालाऽधिकं कालं सगन्धबन्धं स्वजनागृहं नात्यजदिति गम्या सम्भावनाऽत्र । समानो गन्धो यत्रेति । पद्मसरोजयोर्मुख्यत एव स्वजने तूपचारात् । स्वजनो हि स्वजनेन सहाश्लेषसुखमवाप्याधिकं कालं स्वजनागृहं न त्यजति । तथाविधे ह्यालिङ्गनेन स्वजनागृहः प्रकटो भवति ॥१४॥

तत्कालमानन्दमयी भवन्ती भवत्तरानिर्वचनीयमोहा ।
सा मुक्तसंसारिदशारसाभ्यां द्विस्वादमुल्लासमभुङ्क्त मृष्टम् ॥१५॥

सा भैमी तद्दर्शनजं मृष्टं मधुरमतीवरुचिकरमुल्लासं हर्षं द्विस्वादमभुङ्क्त । द्वौ स्वादौ गुणविशेषौ यत्र तं तथा । काभ्यां द्विस्वादम् । मुक्तो मोक्षं प्राप्तो योगी ~~संसी~~ संसारी पुत्रकलत्रादिबन्धनबद्धो गृही तयोर्दशेऽवस्थे, ताभ्याम् । तदेवावस्थाद्वयं विशेषणद्वारेण यथाक्रममाह । कीदृशी सा ? । तस्मिन् हर्षरूपा सम्पद्यमाना । मुक्तः किलानन्दमयो भवति । पुनः कीदृशी ? भवत्तरः प्रकर्षेण भवन्ननिर्वचनीयो मोहो वैचित्र्यं यस्याः सा तथा । संसारिणी चेदं प्रत्यक्षमेव ॥१५॥

दूते नलश्रीभृति भाविभावा कलङ्किनीयं जनि मेति नूनम् ।
न स व्यधान्नैषधकायमायं विधिः स्वयं दूतमिमां प्रतीन्द्रम् ॥१६॥

नलकान्तिमति दूते भावी भवास्नो भावो मनोव्यापारो यस्याः सेयमित्थंभूता कलङ्किनी सापवादा मा जनि, मा भून्नूनमिति हेतोर्विधिः स्वयमात्मस्वरूपेणैव नैषधकायमायं नल-मूर्तिच्छद्मानमिन्द्रमिमां भैमीं प्रतिदूतं नाकरोत् । स विधिरित्यनेन तच्छब्दे-[१६०.६]- न.

तस्या नलसङ्गमलक्षणोऽर्थो मनोरथो द्योत्यते। तेन हि मनसि तस्या नल एव वशीकृतोऽस्ति।
भावः सत्ता स्वभावाभिप्राय चेष्टात्मजन्मसु। कलङ्कोऽङ्कापवादयोः। इति। इत्यत्र
तच्छब्दस्यान्याप्युपपद्यमाना वासनोद्भावनीया ॥१६॥

पुण्ये मनः कस्य मुनेरपि स्यात् प्रमाणमेनस्यपि दृश्यवृत्ति।[1]
तच्चिन्ति चित्तं परमेश्वरस्तु भक्तस्य दृष्यत्करुणो रुणद्धि ॥१७॥

पूर्वोक्तार्थसमर्थनं दर्शयति। कस्य मुनेर्मननशीलस्यापि मनः पुण्ये सुकृत एव प्रमाणम्।
निश्चायकं प्रमाणं हि प्रत्यक्षादि इदमित्थमेवेति प्रत्ययजनकं भवति। यतः कीदृशम्?
एनसि पापेऽपि दृश्यवृत्ति। एतच्च विश्वामित्रादि प्रत्यक्षम्। मनः पुण्येनैव संबद्धं
धूमो वह्निनेवेत्यवश्यंभावो नास्तीत्यर्थः। परमेश्वरः पुनर्भगवान् विधाता दृष्यत् करुणः
सन्, भक्तस्य मनस्तच्चिन्ति एनश्चिन्तनशीलं सत् रुणद्धि तत्प्रति गन्तुं न ददाति।
दृष्यन्ती जाग्रती करुणा यस्य स तथा ॥१७॥

शालीकदृष्टे मदनोन्मदिष्णुर्यथाप शालीनतया न मौनम्।
तथैव तथ्येऽपि नले न लेभे मुग्धेषु कः सत्यमृषाविवेकः ॥१८॥

मदनोन्मदिष्णुत्वात् सा भैमी नलेऽलीकदृष्टे भ्रान्तिवीक्षिते सति, शालीनतया सलज्ज-
-त्वाद् युक्तमपि यथा मौनं नाप तथैव तथ्येऽपि अभ्रान्तेऽपि दृष्टे मौनं न लेभे। युक्तो-
-ऽयमर्थः। मुग्धेष्वज्ञेषु भ्रान्तेषु वा सत्यमृषाविवेकस्तत्त्वातत्त्वविमर्शः कः, अपि तु न
कोऽपि। हेतु हेतुमद्बहुत्वाद् विवेका बहुरूपा भवन्ति। तन्मध्ये कोऽप्येको न भवतीत्यर्थः।
अथवा विवेकः को वराकोऽपि तु, न कोऽपि।[2] तत्रासावकिञ्चित्कर एवेति वा व्याख्या।
तत्त्वतस्तु लोकोक्तेरेवायमनुकार ईदृशः। उन्माद्यतीत्येवंशील उन्मदिष्णुः मदनेनोन्मदिष्णुः
स्याद्[3]धृष्टे तु शालीनः। शालीनतया यन्मौनं युज्यते तत्तथा नापेत्यर्थः। न तु मौनत्यागे
शालीनता हेतुः ॥१८॥

अथ स्वरेणैव विभावयन्ती भावं निजं सा मृदुगद्गदेन।
सखीचये साध्वसबद्धवाचि स्वयं तमूचे नमदाननेन्दुः ॥१९॥

अनन्तरं सा भैमी गद्गदेनास्पष्टेन स्वरेण ध्वनिविशेषणेव निजं भावं मनोभिप्रायं विभा-
-वयन्ती प्रकटयन्ती नमन्मुखचन्द्रा सती स्वयमेव तं नलमूचे। ननु नार्यं स्वामिधर्मो यत्
सन्निहिते सति हिते भृत्ये स्वयमन्यस्योत्तरं दीयत इत्याह। सखीचये साध्वसेन भयेन

1. B1, 8. प्रमाणमास्ते यद्येऽपि धावत. 2. 8. तत्र सा च. 3. 8. -दृष्टे.

बहुवाचि सति । भयं च कोऽयं कुतः कथमित्यागत इत्यादिविस्मयपरवशाशयत्वात् । प्रकृतेरन्यत्र गद्गदेन स्वरेण भा-[161.a]-वोऽवगम्यत एव । तथा च तत्रोक्तम्-

"कम्पोऽङ्गे[1] मुख[2]पाणिपादहृदये स्वेदो, वचो गद्गदम्

नाभीपार्श्वविभूषणस्तनभुजश्रोणीवलीदर्शनम् ।

नीवीस्रंसनमुत्करं प्रहसितं निष्ठीवनं चोच्चकै

रोमाञ्चः कचमोक्षणं स्मरदनैर्नेत्रै मुहुर्वीक्षणम् ॥ [इति] १९॥

नत्वा शिरोरत्नरुचापि पाद्यं सम्पाद्यमाचारविदातिथिभ्यः ।

प्रियाक्षरालीरसधारयापि वैधी विधेया मधुपर्कतृप्तिः ॥२०॥

हे पुरुषविशेष ! आचारविदा वर्णाश्रमादिव्यवहारकुशलेनातिथिभ्यो गृहायातेभ्य- -स्त्वरितं कोष्णजलाभावे प्रह्वीभूय मूर्धमणिकान्त्यापि तावत् पाद्यं पादा[3]र्थोदककार्यं सम्पाद्यं समर्थनीयम् । मधुपर्कस्य दधिमधुघृतादिलक्षणस्य तृप्तिः सुहितता उक्त्या गिरापि युक्ता । अर्थान्मधुपर्कासम्भवे । तस्मात् त्वादृशि विस्मयातिशयविधायिनि प्रियातिथौ मे गिरो धृष्टतानुविधेया ॥२०॥

स्वात्मापि शीलेन तृणं विधेयं देया विहायासनभूर्निजापि ।

आनन्दबाष्पैरपि कल्प्यमम्भः पृच्छा विधेया मधुभिर्वचोभिः ॥२१॥

प्रसङ्गादन्यमप्यतिथिपूजाविधिमाह । स्वात्मा निजदेहोऽपि शीलेन सद्वृत्तेन तृणं विधेयं तृणवदकिञ्चित्करतया निवेद्यम् । तत्र हि विष्टराद्यर्थं दर्भादितृणं युज्यते । किञ्च । निजाप्यासनस्य निवेशनस्य त्य[4]क्त्वा भूर्देया । तत्र हि पद्माद्यासनं युक्तम् । तच्चेन्न सम्भवति । तर्हि यत्र भूमावाचारविदात्मनोपविष्टो भवेत् तामपि सम्भ्रमेण त्वरितं विहाय प्रसादः क्रियतामिहोपविश्यतामिति साऽपि निवेदनीयेत्यर्थः । तथा अम्भ उदकं हर्षाश्रुभि- -रपि कल्प्यं प्रतिपाद्यम् । तत्र ह्यर्घार्थमुदकं कल्प्यते । तथा मधुरैर्वचनैः पृच्छा विधेया स्वागतप्रश्नः कार्यः तत्र च मधुप्रधानानि वचांसि म[5]न्त्रविशेषाः तत्पाठपुरःसरं पृच्छा क्रियते । अद्याहं भवन्तं पूजयिष्यामि, तस्मात् साधु भवा[6]नस्तामित्यादि ॥२१॥

परोपहारेऽनुपपन्नतापि सम्भाव्यतेऽपां त्वरयाऽपराधः ।

तत्कर्तुमर्हत्यञ्जलिसज्जनेन स्वसं[7]सृतिप्राञ्जलतापि तावत् ॥२२॥

1. B. कस्यां 2. B. सुख- 3. B. पादार्थो- 4. B1. त्यक्ता 5. B. मित्र- 6. B. भवान- 7. B1,B- सम्भृति-

पद्योरुपहारे अप्यत्र विषयेऽपराधोऽपि सम्भाव्यते । कोऽपराध इत्याह । त्वरया झटित्येवा-
-पामुदकस्यानुपनमनतानुपस्थितता । तदा हि चरणक्षालनाय झटित्युदकमुपस्थितं युज्यते।
तत् करणात् तावत् कालमञ्जलिसञ्जनेन करसंपुटसंघटनेन कृत्वा स्वसंसृतिप्राञ्जलितापि
कर्तुमर्हा । यावत् पादप्रक्षालनाय जलमायाति तावत्करसंयोजनपुरःसरं सविनयं पूज्यस्य
पुरतः स्थातव्यमित्यर्थः । सञ्जनं मेलनम् । स्वस्य सम्भृतिरासादनं [161·b] विनयेन
निवेदनं, सैव प्राञ्जलतातया वा प्राञ्जलता । तादृशा चरणेन हि मनोगता सरलता ज्ञायते ॥२२॥

पुरा परित्यज्य मयात्यसर्जि स्वमासनं तत् किमिति क्षणं न ।
अनर्हमप्येतदलङ्क्रियेत प्रयातुमीशो यदि चान्यतोऽपि ॥२३॥

यस्मादेवमतिथेः पूजा युज्यते । ततो मया पुरो (रा), प्रथमत एव निजासनं परित्यज्यात्य-
-सर्जि दत्तम् । तत् कारणात् किमित्येतदासनमनर्हमयोग्यमपि क्षणं नालङ्क्रियेत नाधिष्ठीयताम् ।
यदि च भवतोऽन्यतोऽपि गन्तुं स्पृहा तदपि ~~[illegible]~~ क्षणमलङ्क्रियतामित्यर्थः । पुरा परित्यज्य
मयात्यसर्जीत्यपि लोकोक्तिरेव । त्यागस्य पूर्वकालता तु निकटीभवनसम्भाषणाद्यपेक्षया ।
योऽभ्यमायान्तं वीक्ष्य विनीतेन हि प्रथमत एव स्वासनं त्यज्यते । आसनस्यानर्हत्वं पर-
-परिग्रहात् स्वाधिष्ठितत्वाद् वा । यदि वा तस्य महत्त्वापेक्षया तदासनं परार्ध्यमपि
विनयाद् भैम्या न ~~किञ्च~~ किञ्चिदिव परिकलितम् ॥२३॥

निवेद्यतां हन्त समापयन्तौ शिरीषकोषम्रदिमाभिमानम् ।
पदौ कियद्दूरमिमौ प्रयासे निधित्सते तुच्छदयं मनस्ते ॥२४॥

हन्त खेदे । निवेद्यताम् । तव तुच्छदयमल्पतरकृपं मनः । इमावेतादृशौ पदौ कियत्
यावद्दूरं प्रयासे श्रमे निधातुमिच्छति । किं कुर्वन्तौ । शिरीषाख्यः कुसुमकोषस्य मृदुत्व-
-गर्वं परिपूरयन्तौ । ततोऽपि परं म्रदीयांसावित्यर्थः । निवेद्यतामित्यस्य कर्मता वाक्यार्थस्यैव ॥२४॥

अनायि देशः कतमस्त्वया स वसन्तमुक्तस्य दशां वनस्य ।
त्वदाप्तसंकेततया कृतार्था श्रव्यापि नानेन जनेन संज्ञा ॥२५॥

स क प्रकृष्टो विषयो भवता मधुसमयविहीनस्य वनस्यावस्थां नीतः । यथा वसन्त-
-विहीनं वनं निःश्रीकं भवेत् तथा भवता विनाऽधुना स देशः । किञ्च त्वयि विषये
आप्तः संकेतचिह्नं यया सा तथा तथा तस्या भावस्त्वदाप्तसंकेतता तया कृतार्था
सफला संज्ञाऽप्यनेन मल्लक्षणेन जनेन [न] श्रव्या । तव नामश्रवणेऽपि मम किं
नाधिकार इत्यर्थः । 'संज्ञा स्याच्चेतना नाम हस्ताद्यैश्चार्थसूचना' ॥२५॥

तीर्णः किमर्णोनिधिरेव नैव सुरक्षितेऽभूदिह यत्प्रवेशः ।
फलं किमेतस्य तु साहसस्य न तावदद्यापि विनिश्चिनोमि ॥२६॥

एषोऽर्णोनिधिः समुद्र एव किं न तीर्णः। अपि तु स एव तीर्यते स्म। एष क इत्याह। इह सुगुप्ते कन्यान्तःपुरे यत्संचारो जातः। पुनरद्यापि तावन्न विनिर्णयाम्यस्यै तादृशस्य साहसस्यातिनिर्विचारितकर्मणः। किं साध्यमस्तीति। 'सुरक्षिते' प्रवेशोऽभूद् इत्यर्णोधेस्तरणं विधेयं [162.a] विनिश्चिनोमीत्यस्य कर्मता वाक्यार्थस्यैव ॥२६॥

तव प्रवेशे सुकृतानि हेतुर्मन्ये मदक्ष्णोरपि तावदत्र ।
न लक्षितो रक्षिभटैर्यदाभ्यां पीतोऽसि तन्वा जितपुष्पधन्व ॥२७॥

अत्रान्तःपुरे तव प्रवेशे मम नेत्रयोः पुण्यमपि तावद्धेतुरिति मन्ये। यद्धेतोः रक्षिणश्च ते भटाश्च तेषां लक्षैः समूहैर्लक्षितोऽपि मनागपि न वीक्षितः। आभ्यां लोचनाभ्यां[1] तु पीतः सामस्त्येन दृष्टः। कीदृशस्त्वम्? । तन्वा कृत्वा जितपुष्पधन्वाऽधःकृतपुष्पायुध इति चक्षुषोरानन्दहेतुः ॥२७॥

यथाकृतिः काचन ते यथा वा दौवारिकान्धंकरणीव (च) शक्तिः।
रुच्यो रुचीभिर्जितकाञ्चनाभिस्तथापि पीयूषभुजां सनाभिः ॥२८॥

यथा काचनेयमपूर्वा तवाकृतिः। यथा वा द्वारपालदृग् पिधात्री शक्तिः प्रभावः। यथा परिभूतकनकाभिः कान्तिभिः कृत्वा रुच्यो रुचिप्रदोऽसि, तथा त्वमेतैस्त्रिभिश्चिह्नैर्लक्ष्यसे त्वं, कोऽपि पीयूषभुजाममृताहाराणां सनाभिः सगोत्रोऽसि त्वम्। ये पीयूषं भुञ्जते तत्सगोत्रस्त्वम्। न ह्यमृतभोजनमन्तरेणेदृशी तनुकान्तिर्भवेत्। अमृतभोजनाश्च देवा एव। देवानामेवैतादृशी सामग्री भवतीति भावः ॥२८॥

न मन्मथस्त्वं स हि नास्तिमूर्तिर्न चाश्विनेयः स हि नाद्वितीयः।
चिह्नैः किमन्यैरथवा तवेयं श्रीरेव ताभ्यामधिका विशेषः ॥२९॥

हेतुत्रयेण देवत्वे ज्ञाते[2] विशेषसन्देहे सति प्राह। देवानां मध्ये त्वं मन्मथो न भवसि। हि यस्मात् स मन्मथोऽस्तिमूर्तिर्न विद्यते, अपि त्वनस्तिमूर्तिः। अस्ति विद्यमाना मूर्तिर्यस्येत्यस्तिमूर्तिरिति सत्ववाचकेनाव्ययेनास्तिशब्देन समासः। अथवा नास्तिमूर्तिर्नास्तिमूर्तिरिति नास्तिकवत्। स नास्तिमूर्तिरस्तीत्यर्थः। अत्र व्याख्याने तु "न चाश्विनेयः स हि नाद्वितीयः" इत्यत्र निषेधस्य पृथगुपात्तत्वात्क्रमभङ्गः[3] स्यात्।

---

1. B. om. लोचनाभ्यां.  2. B1 ज्ञाते. B. स्ना°  3. B1 -क्रम-

न च त्वमाश्विनेयोऽश्विनीकुमारः। हि यस्मात् योऽद्वितीयो द्वितीयरहितो नास्त्येव। आश्विनेयौ ह्यविनाभावेन युगलचारिणौ। अथवा तयोर्विभेदकैरन्यैश्चिह्नैः किं प्रयोजनम्। यतः तवैवमीदृशी अनन्यसाधारणाश्रीः कान्तिरेव ताभ्यां सकाशादधिकातिरिक्ता विशेषो विभेदोऽस्ति। विशेषणं हि विभेदकं भवति। तस्मात् ताभ्यामपरः, कश्चन त्वमरः। रूपेण च दिवि तत्[स] समतया नान्यः सुमनाः ॥२९॥

आलोकतृप्तीकृतलोक! यस्त्वामसूत पीयूषमयूखमेतम्[1]।
कः स्पर्धितुं धावति साधु सार्धमुदन्वता नन्वयमन्ववायः ॥३०॥

हे आलोकतृप्तीकृतलोक! ननु भोः अयं कोऽन्ववायो वंशः साधु सम्यक् उदन्वता क्षीरनीरनिधिना सार्धं सहर्षं स्पर्धां[2] कर्तुं धावति। अयं क इत्याह। यस्त्वामेतमेवंविधं [3]पीयूषमयूखमसूत। पीयूषमयूखश्च-[162-b]-न्द्रो रुच्या। आलोक [4]उद्योतस्तेन तृप्ती-कृतो लोको येन चन्द्रेण स तथा। त्वत्तस्तु आलोकेन दर्शनेन तृप्तीकृतलोको नलः तथा पीयूषमेव मयूखा देहरश्मयो यस्य स तथा। धर्मसाम्यात् स्पर्धा भवत्येव ॥३०॥

इतीरयन्ती नलसुन्दरं तं मत्वामरं रश्मिजनाक्षिबन्धात्।
आतिथ्यचाटून्यपदिश्य तत्स्थां श्रियं प्रियस्यास्तुत वस्तुतः सा ॥३१॥

सा भैमी नलसुन्दरं रश्मिवर्गनयनपिधानादमरं मत्वा इति पूर्वोक्तं वक्ष्यमाणं वा ईरयन्ती सती, अतिथिपूजा, प्रियवचनानि व्याजीकृत्य वस्तुतस्तात्पर्यवृत्तितस्तस्मिन् देवदेवत्वेन सम्भाविते पुंसि तिष्ठतीति तत्स्था तां प्रियस्य नलस्यैव श्रियं शोभा-मस्तुत स्तुतवती। नले वर्तमानं सौन्दर्यं [5]रश्मिजनाक्षिबन्धन[6]शक्तेश्च द्वयं देवज्ञाने हेतुः ॥३१॥

वाग्जन्मवैफल्यमसह्यशल्यं गुणाद्भुते वस्तुनि मौनिता चेत्।
खलत्वमल्पीयसि जल्पितेऽपि तदस्तु बन्दिभ्रमभूमितैव ॥३२॥

गुणैः कृत्वा यदद्भुतं वस्तु, तस्मिन् यदि मौनिता वाचं यमत्वं मुख्यमुद्रेति यावत्। तर्हि वाग्जन्मनो वैफल्यं विफलत्वमेवासह्यशल्यम्। असह्यं च तच्छल्यं चासह्यशल्यम्। गुणाद्भुतं वस्तु यदि न वर्ण्यते, तदा वाक्सम्भवो निष्फलत्वाच्छल्यवत् [7]कण्टकादिवत् [8]अरुन्तुदः व्यथकः स्यात्। अल्पीयसि कृत्वा तस्मिन् पुनर्जल्पितेऽल्पतरे विसदृशभाषिते खलत्वं दुर्जनत्वं भवेत्। तस्मात् बन्दिभ्रमभूमितैवास्तु। बन्दी स्तुतिपाठकस्तस्य भ्रमो

---

1. B. -मेनम्. 2. B. om. स्पर्धां. 3. B. om. पीयूषमयूखमसूत. 4. B1. उद्द्योतः—
5. B. धनरश्मि. 6 B1. -शक्तिश्च. 7. B. om. कण्टकादिवत्. 8. B. अरुन्तुदो भवति.

भ्रान्तिस्तस्य भूमिः स्थानं, तस्या भावो बन्दिभ्रमभूमित्ता। पूर्वोक्तकारणद्वयेन मां बहुधा भवन्तं स्तुवती जनो वरं बन्दिनीं सम्भावयत्वित्यर्थः। चेदीदृशि वस्तुनि मौनित्ता भवेत् तदा खल्वसह्यशल्यं वाग्जन्मवैफल्यं स्यादिति वाऽन्वयः। तदा असह्यं शल्यं यस्येति भेदेऽर्थविशेषो यथाकथञ्चिद् घटनामानयनीयः। शल्यमिव शल्यमति-व्यथाकारित्वादिति वा ॥३२॥

कन्दर्प एवेदमविन्दत त्वां पुण्येन मन्ये पुनरन्यजन्म।
चण्डीशचण्डाक्षिहुताशकुण्डे जुहाव यन्मन्दिरमिन्द्रियाणाम् ॥३३॥

मन्ये कन्दर्प एव पुण्येन कृत्वा त्वां भवन्तमेव पुनर्भूयोऽन्यजन्म लेभे। भवान् काम एव पुण्यवशात् पुनर्जातोऽस्तीत्यर्थः। कथं तस्येदृशं पुण्यमित्याह। यस्मात्स इन्द्रियाणां मन्दिरं देहं चण्डीशस्य चण्डमक्ष्ण्येव[1] हुताशस्य वह्नेः कुण्डं तत्र जुहाव। अनेन च कर्मणा यत्सुकृतमुदयेत तदागमेषु प्रसिद्धमेव। तस्य च तथाविधं चरितं प्रसिद्धम् ॥३३॥

शोभायशोनिर्जितशैवशैलं करोषि लज्जागुरुमौलि[2]मैलम्। [163 a]
दस्रौ हठश्रीहरणादुदस्रौ कंदर्पमप्युज्झितरूपदर्पम्[3] ॥३४॥

कान्तिकीर्तितिरस्कृतकैलासमैलं पुरूरवसं[4] त्रपाभरभङ्गुरग्रीवं कुरुषे। पुरूरवाश्च कान्तिमत्तया श्रुतावप्याख्यायते। तथा च तत्र उर्वशीह्यप्सराः पुरूरवसमैलं चकमे इत्यादि। दस्रावाश्विनेयौ कान्त्या प्रसिद्धावेव तावपि हठश्रीहरणादुद्गतनयनजलौ करोषि। यस्य च श्रीः केनापि बलेन ह्रियते, सोऽवश्यमुद्गतास्रो भवति। किञ्च काममपि त्यक्तसौन्दर्यगर्वं करोषीति दीपकम्। अत्र सम्भावना ॥३४॥

अवैमि हंसावलयो बलाका[5]स्त्वत्कान्तिकीर्तेश्चपलाः पुलाकाः।
उड्डीय युक्तं पतिताः स्रवन्तीवेशन्तपूरं परितः प्लवन्ते ॥३५॥

हंसानामावलयः श्रेणयः बलाका बकपत्न्यः एता एव त्वत्कान्तिकीर्तेश्चपलाः पुलाकाः तुच्छाः कणा उड्डीयोत्पत्य स्रवन्तीवेशन्तपूरं परितः पतिताः सन्तो युक्तं प्लवन्ते उचितं तरन्ति। पुलाका हि तुच्छधान्यानि परहकसंज्ञानि प्रस्फोटनवशादु-ड्डीय नदीवेशन्तपूरे पतिताः सन्तो निःसारतया तरन्ति, न तु मज्जन्ति। यथावर्णं च प्रकृतं सारधान्यमसारमपि तथा वर्णमेव प्रायो भवति। ततो मनाग्धीनवर्णं स्या। अतो युक्ता हंसबलाकाभ्योऽपि तत्कान्तिकीर्तेरतीव वैशद्यं द्योत्यते। स्रवन्त्यो[6] नद्यो

1. B. -श्रैव. 2. B. -मौनि- 3. B. -दर्प्यम. 4. B. -पौररवसं. 5. B. -वलक्षा. 6. B. -नो.

वेशन्ता अल्पसरांसि तेषां पूरं मध्यभागं परित इति परितो योगे द्वितीया। समन्ततस्तु परितः। पुलाकं तुच्छधान्ये स्यात् संक्षेपे भक्तसिक्थके। हंसावलयो बलाकाश्चानुधाः पुलाकास्तु विधेयाः। हंसावलयो बलाकाश्चातीव सिता, नदीतडागादिषु प्लवमाना दृश्यन्त एवेति सम्भावना ॥३५॥

भवत्पदाङ्गुष्ठमपि श्रिता श्रीर्ध्रुवं न लब्धा कुसुमायुधेन।
रतीशजेतुः खलु चिह्नमस्मिन्नर्धेन्दुरास्ते [1]नखकैतवेन ॥३६॥

तव पदस्य य एकोऽङ्गुष्ठस्तत्रस्थापि श्रीः [2]शोभा नूनं कामेन न प्राप्ता। खलु यस्मात् रतीशजेतुः स्मरारेर्भगवतो भवस्य चिह्नमर्धेन्दु[3]रेवाङ्गुष्ठे आस्ते। केन? नखकैतवेन। अर्धचन्द्रो हि स्मरारेर्लिङ्गं लिङ्गच्च लिङ्गिनः प्राप्तिः, भवत्येवातो मदनदहनोऽपि तत्र सन्निहितो[4]ऽतो मदनस्तत्र मा यातु यत्तच्छ्रियं लभताम् ॥३६॥

राजा द्विजानामनुमासभिन्नः पूर्णां तनूकृत्य तनूं तपोभिः।
कुहूषु दृश्येतरतामिषेण सायुज्यमाप्नोति भवन्मुखस्य ॥३७॥

द्विजानां राजा चन्द्रः। अथ च ब्राह्मणानामधिपति [5]मान्त्रकोऽपि। अनुमासं प्रतिमासं तपोभिः कृत्वा पूर्णां तनूं मूर्तिं अतनूं विपुलां सतीं तनूकृत्य [6]कृशीयस्त्वं नीत्वा भिन्नोऽन्यो भूतः [163-b] कुहूष्वमावास्यासु या दृश्येतरता, अदृश्यता, तस्या मिषेण भवन्मुखस्य सायुज्यं सहसायोगि[7]तां लभते। सायुज्यं मुक्तिभेदः। तद्योगाच्च तन्मुखस्यातीव महत्त्वमायातम्। अन्योऽपि द्विजराजोऽनुजन्मनि भिन्नो भूत्वाऽवतीर्णः सन्, तपोभिः पूर्णां तनूं तनूकृत्य भगवतः शम्भोरम्भोजनाभेर्वा सायुज्यमाप्नोति। आराध्यात्त्वाराधको दूरमपकृष्ट एव ॥३७॥

कृत्वा दृशौ ते बहुवर्णचित्रे किं कृष्णसारस्य दृशोर्मृगस्य।
अदूरजाग्रद्द्विदरप्रणाली[8]च्छलादयच्छद्विधिरर्धचन्द्रम् ॥३८॥

हे वीर! तव चित्रे चित्रहेतुभूते दृशौ निमार्य किं कृष्णसारस्य मृगस्य दृशोरर्धचन्द्रं विधिरयच्छत्। कस्मात्? अदूरे निकटे जाग्रती विस्पष्टा द्वि[9]दरमेव प्रणाली प्रणाल्यौ वा जलवहनपात्रविशेषौ तयोश्छलान्मिषात्। द्वयोर्दरयोः समाहारो द्विदरं पात्रादि। अथवा द्वौ दरावेव प्रणाल्यौ। अर्धचन्द्रलक्षणया गलहस्तः पूर्वं बहुकृत्वो व्याख्यात एव। अत्रापि सम्भावना ॥३८॥

---

1. B. नखवेशधारी. 2. B. om. शोभा. 3. B. –रत्ना– 4. B. om. –ऽतो. 5. B. मान्त्रिको– 6. B. कृशीय— 7. B1. –तां. 8. B. –रेखामय–. 9. B1. द्विरद—

मुग्धः स मोहात्सुभगान्न देहाद्ददद्भवद्भ्रूरचनाय चापम् ।
भ्रूभङ्गजेयस्तव यन्मनोभूरनेन रूपेण यदातदाभूत् ॥३९॥

स मनोभूर्मोहान्मुग्धो, न तु सुभगाद् देहात्। तस्य यद्देहस्य सुभगत्वान्मौग्ध्यं प्रसिद्धं, तत्तथा नैव, अपि तु मूढत्वादेव तस्य तत्। किं कुर्वन्। भवतो भ्रुवोर्निर्माणाय स्वं चापं ददत्। यद्ययं मुग्धो न भवेत्, तदा भवद्भ्रूरचनाय स्वं चापं न दद्यात्। ननु भवद्भ्रूरचनाय स्वं चापं ददतः कथं मूढत्वमायातमित्याह। यत्कारणादनेन रूपेण कृत्वा तव यदातदा यस्मिँस्तस्मिन्नपि काले भ्रूभङ्गजेयोऽभूत्। यदैव त्वं भ्रूभङ्गं करोषि, तदैवानेन रूपेण तं जयसि। [1]अस्त्रभङ्गे चावश्यं योद्धा भयेऽपि प्रतियोधेन जीयत एव। तव भ्रुवौ तस्य चापस्तयोर्भङ्गे तद्भङ्गस्तद्भङ्गे च तस्य पराजयो युक्त एव। तत्त्वतस्त्वस्य रूपेण प्रतिस्पर्धमानं प्रतिभ्रुकुटिरचनैव भ्रूभङ्गः। तद्भङ्ग-मात्रजयकथनादनायाससाध्यत्वं जयस्य प्राप्यते ॥३९॥

मृगस्य नेत्रद्वितयं तवास्ये विधौ विधुत्वानुमितस्य दृश्यम्।
तस्यैव चञ्चत्कचपाशवेषः पुच्छः स्फुरच्चामरगुच्छ एषः ॥४०॥

तवास्ये मुख एव विधौ विधुत्वेनानुमितस्य तर्कितस्य मृगस्यैव ~~स्फुट~~ नेत्रद्वितयं दृश्यं यद् भवन्नेत्रत्वेनापदिश्यमानमस्तीत्य[2]ध्याहार्यम्। यत्र विधुस्तत्रावश्यं मृगो, यथा-ऽस्मिन् प्रसिद्धे विधौ एष चञ्चत्कचपाशवेषस्तस्यैव पुच्छः। मृगस्यावश्यं पुच्छे-[164.a]-न भाव्यम्। कीदृशः? स्फुरच्चामरगुच्छः, स्फुरन्नुल्लसन् चामरस्य गुच्छः स्तबको यस्य यत्र वा। चामरत्वाच्च महत्त्वमायातम्। अन्यथा सामान्यमृगस्य पुच्छे तथा केशगुच्छो न दृश्यते। स च विधोर्दैवस्यामृतमयस्याङ्कस्थः कश्चनान्य एव रङ्कुरतस्तत्पुच्छश्चामराकारः खलु निर्विचारः ॥४०॥

आस्तामनङ्गीकरणाद्भवेन दृश्यः स्मरो नेति पुराणवाणी।
तवैव देहजितया श्रियेति नवस्तु वस्तु प्रतिभाति वादः ॥४१॥

"भवेन शिवनयनेन कृत्वा हेतुना वा यदनङ्गीकरणं, तस्मात् स्मरो न दृश्यः" इत्येतादृशी पुराणवाणी, जीर्णा वाक् आस्तां तिष्ठतु। तया न किञ्चित् प्रयोजन-मित्यर्थः। तवैव देहजितया श्रियाऽनङ्गीकरणान्न दृश्य इत्येष नवस्तरुणो वादो वचनं वस्तु तत्त्वरूपं प्रतिभाति। अयमेवोपादेय इत्यर्थः। पुराणी चासौ वाणी च।

1. ख. वस्तुभङ्गे  2. ख. -ध्याहाराम्.

न विद्यतेऽङ्गं यस्यासावनङ्गः। अनङ्गस्यानङ्गस्य करणमनङ्गीकरणं, अमूर्तीकरणमित्यर्थः। देहश्रीपक्षे तु नाङ्गीकरणमनङ्गीकरणम्। छलपक्षे तु शब्दमात्रेण साम्यम्। तत्त्वतस्त्वर्थ-भेदोऽस्त्येव। तत्त्वपक्षे च पुराणानां वाणी, पुराणवाणी। नवोऽपूर्वो वादस्तर्कः। तत्र स नास्तीत्यर्थः ॥७१॥

त्वया जगत्युच्चितकान्तिसारे यदिन्दुनाशीलि शिलोञ्छवृत्तिः।

आरोपि तन्माणवकोऽपि मौलौ स यज्वराज्येऽपि महेश्वरेण ॥७२॥

त्वया विश्वे गृहीतकान्तिस्थिरांशे सति यत्कारणादिन्दुना शिलोञ्छवृत्तिरशीलि शीलिता सम्यग्ग्रस्ता। तत्कारणात् स माणवको बटुरपि महेश्वरेण राज्ञा निजमौलौ मुकुटे आरोपि धृतः। बहुमानपात्रीकृत इत्यर्थः।[1] न परं निजमौलावारोपि यज्वनां याज्ञिकानां राज्य आधिपत्येऽप्यारोपि तत् प्राधान्यं नीत इत्यर्थः। शिलोञ्छेन वृत्तिराजीवनं शीलोञ्छ-वृत्तिर्ऋतनाम्नी। ऋतं सत्यमेव हि शिलोञ्छवृत्तिः। यवगोधूमादीनां परिपक्वे क्षेत्रे स्वामिना लवनपुरःसरमुच्चितसारे सति प्रतिग्रहनिवृत्तो बालोऽपि द्विजः शिलमुञ्छं वा ध्रुवं वा कृत्वा प्राणयात्रां वा करोति। गलितवल्लरीलेश्यादिग्रहणं शीलम्। अंशो धान्य-समुत्कीर्य विषमभूमिगतधान्यकणग्रहणमुञ्छः। तत्त्वतस्तु माणवक इन्दुर्बालो लेखारूपः। मौलौ महेश्वरस्य स्थितिः प्रसिद्धैव। यज्वानो हि द्विजास्तेषां च राजा प्रसिद्ध एव। एतेन नलकान्ति चन्द्रकान्त्योर्वीर्योऽन्तरं कथितम् ॥७२॥

आदेहदाहं कुसुमायुधस्य विधाय सौन्दर्यकथादरिद्रम्।

त्वदङ्गशिल्पात्पुनरीश्वरेण चिरेण जाने जगदन्वकम्पि ॥७३॥

कन्दर्पतनुदहनं यावद् [164·b] रामणीयकलेशरिक्तं कृत्वा भगवता ईश्वरेण भवद्देहविधानेन जाने बहुना कालेन जगदनुकम्पितं, त्वया दृष्टम्। अन्योऽपीश्वरो राजा कञ्चन कनकटङ्कलेशादिदुर्गतं कृत्वा चिरेण बहुमनकेषुकादिदानेन तमनुकम्पते ॥७३॥

मही कृतार्था यदि मानवोऽसि, जितं दिवा यद्यमरेषु कोऽपि।

कुलं त्वयालङ्कृतमौरगं चेन्नाधोऽपि कस्योपरि नागलोकः ॥७४॥

यदि त्वं मनुष्यस्तर्हि भूः कृतार्था। यदि त्वं कोऽप्यनिर्वचनीयगुणो देवोऽसि, तर्हि दिवा स्वर्गेण जितम्। चेत्त्वया उरगसंबन्धिकुलमलङ्कृतं, तर्ह्यधोऽपि वर्तमानो नागलोकः कस्योपरि न, अपि तु मूर्त्याधो वर्तमानोऽपि गुणैः सर्वेषामुपरि। कस्य ब्रह्मणो वा उपरि। ब्रह्मलोकस्याप्युपरीत्यर्थः।

1. B1. न परं ---- नीत इत्यर्थः। 2. बहुमनकेषुकादि- ?

सेयं न धत्तेऽनुपपत्तिमुच्चैर्मच्चित्तवृत्तिस्त्वयि चिन्त्यमाने ।
ममौ स भद्रं चुलुके समुद्रस्त्वयात्तगाम्भीर्यमहत्त्वमुद्रः ॥७५॥

सेयं मम चित्तवृत्तिस्त्वयि विमृश्यमाने सति । उच्चैरधिकामनुपपत्तिमघटनां न धत्ते । स तादृशः समुद्रोऽगस्त्यमुनेश्चुलुके भद्रं भव्यं ममौ उपपद्यत एवैतत् । यतः कीदृशः ? त्वया आत्ता गृहीता गाम्भीर्यमहत्त्वयोर्मुद्रा यन्त्रणा यस्य स तथा । पूर्वं चातीव तुच्छत्वाद् युक्तं स चुलुके ममौ । गाम्भीर्यम[1]गाधता महत्त्वमपारत्वा[2]म् । गाम्भीर्यस्यैव वा महत्त्वम् ॥७५॥

संसारसिन्धावनुबिम्बमत्र जागर्ति जाने तव वैरसेनिः ।
बिम्बानुबिम्बौ हि विहाय धातुर्न जातु दृष्टातिसरूपसृष्टिः ॥७६॥

जानेऽत्र संसारसिन्धौ तवैवानुबिम्बं वैरसेनिः । अतिप्रकटं हि यस्मात्तु बिम्बानुबिम्बौ वर्जयित्वा कदाचिदतिसदृशः सर्गो नानुभूतः ॥७६॥

इयत्कृतं केन महीजगत्यामहो महीयः सुकृतं जनेन ।
पादौ यमुद्दिश्य तवापि पद्मारजःसु पद्मस्रजमारभेते ॥७७॥

महीजगत्यां भूलोकेऽहो इयन्महीयः(य) एतावदधिकतरं सुकृतं केन जनेन कृतम् । यं जनमुद्दिश्यानुसंधाय तवापि पादौ सरणिरेणुषु कमलमालां सृजतः । तस्य हि पादयो रेखापद्मानि सन्ति, तानि च पादयोरनुपात[3]कृतत्वात् पद्मारजःसु प्रतिबिम्ब्यन्ते एव तत्र च कर्पूररजो वर्णितमेव । कः स धन्यतमो जनो यन्निमित्तं भवान्येतौ मृदुतरौ पादौ सरजसि मार्गे निमिनो[4]षीत्यर्थः । जगती जगति छन्दोविशेषे[5] च क्षितावपि ॥७७॥

ब्रवीति ते (मे) किं किमियं न जाने सन्देहदोलामवलम्ब्य संवि[6]त् ।
कस्यासि धन्यस्य गृहातिथिस्त्वमलीकसम्भावनयाथवालम् ॥७८॥

इयं मम संविच्चेतना सन्देहमेव तुलां संश्रित्य [165.a] न जाने किं किं ब्रवीति । किं ब्रवीतीत्याह । कच्चिदभीष्टतमत्वमन्यस्य न गृहातिथिरपि तु ममैव त्वं प्राघुणकः मन्ये ~~ममैव त्वं~~ च इत्यर्थः । अथवा एवमित्थमलीकसम्भावनाया मिथ्याघटनया पर्याप्तम् । एतादृशी मिथ्यासम्भावना नैव कर्तुं युक्तेत्यर्थः । गृहस्यातिथिरित्यनेन ग्रामातिथ्यादयो व्यवच्छिद्यन्ते राजपुरुषादयो हि ग्रामातिथयोऽपि भवन्ति । 'प्रेक्षोपलब्धिश्चित् संवित् प्रतिपद् ज्ञप्तिचेतनाः' ॥७८॥

1. B. -मस्ताधता. 2. B. -ताम्. 3. A1, B. -पात- 4. A1. -नी- 5. B. पि. 6. B. संचित्.

प्राप्तैव तावत् तव रूपसृष्टिं निपीय दृष्टिर्जनुषः फलं मे ।
अपि श्रुती नामृतमाद्रियेतां तयोः प्रसादीकुरुषे गिरं चेत् ॥४९॥

तव लावण्यनिर्माणमनुभूय मम दृष्टिस्तावज्जनुषो जन्मनः फलं प्राप्तैव । अत्र सन्देहो नास्ति । दृष्टिसृष्टेरेतदेव फलं यद् भवादृशा दृश्या दृश्यन्ते । श्रुती श्रवणा-वप्यमृतं नाद्रियेतामास्वादं नाङ्गीकुरुताम् । चेद्यदि तयोः श्रुत्योर्गिरं निजवाचं प्रसाद-दायतां नयसि । तयैव तत्कार्यस्य कृतत्वात् । आगमनप्रयोजनं निवेदयतामित्यर्थः ॥४९॥

इत्थं मधूत्थं रसमुद्गिरन्ती तदोष्ठबन्धूकधनुर्विसृष्टा ।
कर्णात्प्रसूनाशुगपञ्चबाणी वाणीमिषेणास्य मनो विवेश ॥५०॥

पुष्पबाणस्य पञ्चशरी भैम्या या वाणी वाक्, तस्या मिषेण कर्णात् सकाशादस्य नलस्य मनः प्रविष्टा । कर्णादस्यैव श्रवणसमनन्तरमस्य प्राप्य, हृदीभूय स्थितेत्यर्थः । कीदृशी ? तस्योष्ठाद्येव लौहित्याद् बन्धूककुसुमम् । तदेव धनुस्तेन विसृष्टा, विक्षिप्ता । प्रसूनाशुगस्य हि धनुरपि प्रसूनमेव युज्यते, तत्सम्पत्तिस्त्वेवम् । किं कुर्वती ? इत्थं पूर्वोक्तयुक्त्या मधूत्थं क्षौद्रं रसं समुद्गिरन्ती, संक्षरन्ती । अन्याऽपि वाणी कर्णान्मनः प्रविशति । तत्र तु कर्णो धानुष्कस्यैव ॥५०॥

आकण्ठमामज्जदसौ सुधासु प्रियं प्रियाया वदनान्निपीय ।
द्विषन्मुखेऽपि स्वदते स्तुतिर्या तन्मृष्टता नेष्टमुखेऽस्त्वमेया ॥५१॥

प्रियाया वदनात् प्रियं रुचितमर्थं सादरं श्रुत्वा कण्ठं यावदसावमृतेषु मग्नः । अतीव तमां मुदितोऽभूदित्यर्थः । युक्तमेतत् । या स्तुतिर्निजप्रशंसा शत्रुवदनेऽपि वर्तमाना सती स्वदते तरेभ्यो रुचिमुपचिनोति । तस्या मृष्टता इष्टस्य प्रियस्य मुखे वर्तमाना अप्रमेया मानरहिता मास्तु, अपि भवत्येव । अप्रियेणापि वितन्यमाना धन्यानां स्तुतिरतितोषपोषकर्त्री किं पुनर्मित्रीभूतप्रतीतजनेन ॥५१॥

पौरस्त्यशैलं जगतीमणीतां गृह्णन् यथाह्नःपतिरर्घपूजाम् ।
तथातिथेयीमथ स प्र-[165-6]-तीच्छन् प्रियार्पितामासनमाससाद ॥५२॥

अह्नःपतिः सूर्यः जनतया, जनानां समूहेन, तथा, जनतया, ब्राह्मणादिसमूहेनो-पनीतामुपहृतम् । अर्घपूजां कुसुमादिकां गृह्णन्, यथा पौरस्त्यं शैलं प्राच्यं पर्वतमुदयाचलमासादयति । तथा स नलो भैमीवदनानन्तरं प्रियया स्वयं दत्तामा-तिथेयीमर्घादिकां पूजां प्रतीच्छन्नादरात् प्रतिगृह्णन्नासनमुच्चतरं सौवर्णमासीददिति स्म । अतिथौ साध्व्यातिथेयी सपर्या ॥५२॥

अयोधि तद्धैर्यमनोभवाभ्यां तामेव भूमीमवलम्ब्य भैमीम् ।
आह स्म यत्र स्मरचापमन्तश्छिन्नं भ्रुवौ तज्जयभङ्गवार्ताम् ॥५३॥

तस्य नलस्य धैर्यं मनोभवश्च तामेव भैमीं भूमीं युद्धाय संस्कृत्य परिकलितां भुवं सम्यग् यथावदवलम्ब्य समाश्रित्य युध्यते स्म । तत्र युद्धभूमौ भ्रुवावेवान्तश्छिन्नं कृतं सत् स्मरस्य चापं कर्तृ तयोर्द्वयोर्जयभङ्गयोरुत्कर्षापकर्षयोर्वार्तामाह स्म । यस्य धनुश्छिन्नं, तस्य पराजयो यत्प्रतिभटस्य धनुश्छिन्नं तस्यार्थाज्जयः । चलनहेतौ प्रचलेऽपि सत्त्वाधिक्यात् स धैर्यात् न चलित इत्यर्थः ॥५३॥

अथ स्मराज्ञामवधीर्य धैर्यादूचे स तद्वागुपवीणितोऽपि ।
विवेकधाराशतधौतमन्तः सतां न कामः कलुषीकरोति ॥५४॥

तस्या वाचा उपवीणितोऽपि, वीणाश्रवणसुखं प्रापितोऽपि सन्, अनन्तरं धीरत्वात् स कामादेशमवक्षिप्योवाच । युक्तमेतत् । विवेकस्य धाराणां शतानि, तैर्धौतं क्षालितं महात्मनामन्तःकरणं खलु कामो न मलिनयति । तद्वागुपवीणितोऽपीति धैर्यचलनहेतुसद्भावः । विवेकधारेति धारोपादानात् विवेकस्य द्रवद्रव्यत्वमायातं, तच्च द्रव्यमन्नामृतमेव गङ्गोदकं वा ॥ ५४॥

हरित्पतीनां सदसः प्रतीहि त्वदर्थमेवातिथिमागतं माम् ।
वहन्तमन्तर्बहुनादरेण प्राणानिव स्वप्रभुवाचिकानि ॥५५॥

हे नृपात्मजे ! दिगीशानां सदसो वृन्दात् सकाशात् भवन्निमित्तमेव प्राप्तं प्राधुणकं प्रतीहि विनिश्चिनु । किं कुर्वन्तम् । निजस्वामिसन्देशवाचः सुरक्षत्वादसूनिव महता यत्नेनान्तर्हृदये धारयन्तम् । वहन्तमित्यनेन वहनीयवस्तुनो गरीयस्त्वं द्योत्यते ॥५५॥

विरम्यतां भूतवती सपर्या निविश्यतामासनमुज्झितं किम् ।
या दूतता नः फलिता विधेया सैवातिथेयी पृथुरुद्भवित्री ॥५६॥

विरम्यतां निवृत्यताम् । अर्थात् पूजासमुद्यमात् । सपर्या पूजा भूतवती भूता सञ्जातेति ज्ञातिरियमस्यावसरस्थ । निविश्यतामास्यताम् । आसनं किमित्युज्झितम् । यतः यन्नोऽस्माकं दूत्यं सार्थकं कर्तव्यं, [166.a] सैव पृथुर्भूयस्यातिथेयी पूजा समुत्कृष्टा भविष्यति । न इति दूतरूपस्यात्मनो महत्त्वख्यापनार्थं चतुर्णां दूतकर्मणः पृथक्त्वाद् वा बहुवचनम् ॥५६॥

कल्याणि ! कल्यानि तवाङ्गकानि कच्चिन्न तमां चित्तमनाविलं ते ।
अलं विलम्बेन गिरं मदीयामाकर्णयाकर्णलसायताक्षि ! ५७॥

कौमारमारभ्य गणा गुणानां हरन्ति ते दिक्षु धृताधिपत्यान् ।
सुराधिराजं सलिलाधिपं च हुताशनं चार्यमनन्दनं च ॥५८॥

हे भैमि! बाल्यात् प्रभृति तव गुणानां गणा दिशामधीशान् हरन्ति, समाकृष्य स्ववशतां नयन्ति। कं कमित्याह। इन्द्रं वरुणं वह्निं यमं चेति चतुरोऽपि ॥५८॥

चरच्चिरं शैशवयौवनीयद्वैराज्यभाजि त्वयि खेदमेति।
तेषां रुचश्चौरतरेण चित्तं पञ्चेषुणा लुञ्चितधैर्यवित्तम् ॥५९॥

अथ तेषां चित्तं कर्तृ त्वयि विषये चरत् सत् खिद्यते। त्वयि कीदृश्याम्। बाल्य-तारुण्यसंबन्धि यद् द्वैराज्यं तद्भजत इति द्वैराज्यभाक्। तत्र द्वौ राजानौ यत्र तस्य भावो द्वैराज्यं द्विराजत्वम्। कीदृक् चित्तम्?। रुचः कान्तेश्चौरतरेण प्रकृष्टचौरेण लुञ्चितमुपर्युपरि छिन्नं धैर्यमेव वित्तं क्षेत्रगतशस्य शाकादिजीवनहेतुर्यस्य तत् तथा। 'लुण्ठित' इति पाठे वित्तं कनकादि। अन्योऽपि द्वैराज्यभाजि भुवि चरन् प्रकृष्ट-तमचौरेण हृतवित्तः सन् खिद्यते। द्वैराज्ये नीतिभङ्गात् चौराः प्रबला भवन्ति। एतेन भैमीविरहात् तेषां तनुविच्छायता कातरता सूचिता। शैशवयौवनयोर्द्वैराज्यं वयःसन्धिः ॥५९॥

तेषामिदानीं किल केवलं सा हृदि त्वदाशा विलसत्यजस्रम्।
आशास्तु नासाद्य तनूरुदाराः पूर्वादयः पूर्ववदात्मदाराः ॥६०॥

किलेति सत्ये। सम्प्रति तेषां हृदि परं सा तादृशी महती त्वदाशा भवत्प्राप्ति-स्पृहा निरन्तरं विलसति, परिस्फुरति। तेषां मनसि भवत्प्राप्तेराशैव सन्ततं वसतीत्यर्थः। अथ च आशा नाम्नी नायिका तेषां हृदि वक्षसि विलसति क्रीडा-सुखमनुभवतीत्यर्थान्तरम्। तु पुनः, आत्मदारा निजकलत्ररूपा आशाः प्राच्यादयः उदाराः सदलङ्कारवासाः स्रक्चन्दनाद्याः तनूर्देहानासाद्य पुरेव पूर्ववन्न विलसन्ति। सम्प्रति तदाधिपत्यायातविविधभोगयोगस्तेषां नास्तीत्यर्थः ॥६०॥

अनेन सार्धं तव यौवनेन को-[166. 6]-टिं पराभच्छिदुरोऽध्यरोहत्।
प्रेमापि तन्वि! त्वयि वासवस्य गुणोऽपि चापे सुमनःशरस्य ॥६१॥

हे तन्वि! अनेन तव यौवनेन सहैवाच्छिदुरो दृढतरो वासवस्य त्वयि विषये प्रेमापि स्नेहोऽपि परां कोटिमध्यरोहत्। सुमनःशरस्य कामस्य गुणोऽपि चापे विषये परां कोटिमध्यरोहदिति सहोक्तिरलङ्कृतिः। प्रेमपक्षे परा कोटिः परा काष्ठा परा भूमिरित्यर्थः। चापपक्षे परा कोटिरुपरिभागाटनिः। गुणो मौर्वी। त्वद्यौवनप्रवेश-

-दिनमारभ्य त्वद्गतमानसमेनं कुसुमसायक[1]शरव्यं कर्तुं न व्याकृतसमुद्यमोऽस्तीत्यर्थः ॥६१॥

प्राचीं प्रयाते विरहाद्रयं ते तापाच्च रूपाच्च शशाङ्कशङ्की ।
परापराधैर्निदधाति भानौ रुषारुणं लोचनवृन्दमिन्द्रः ॥६२॥

इन्द्रः परस्य शशाङ्कस्यापराधैरागोभिः क्रोधेन लोहिनीं नेत्रदशशतीं भगवति भानौ धारयति । कीदृशे ? प्राचीं दिशं प्रयाते । यदा भगवान् भास्वान् पूर्वां दिशमाश्रयति, तदा तदधिपतेस्तेनातीव सान्निध्यं, [2]सामीप्यम् । यतः कीदृशः ? त्वद्विरहजात् तापात् संज्वरात् च रूपाच्च मण्डलसंस्थानात् । शशाङ्कशङ्की । अनयो-रेकेनैव शङ्का स्यात् । किमुत द्वाभ्यां सबलाभ्याम् । तत्र त्वद्विरह एव हेतुः ॥६२॥

त्रिनेत्रमात्रेण रुषा कृतं यत्तदेव योऽद्यापि न संवृणोति ।
न वेद रुष्टेऽद्य सहस्रनेत्रे गन्ता स कामः खलु कामवस्थाम् ॥६३॥

न जाने नूनमद्य सहस्रनेत्रे रुष्टे सति स दुर्विनीतः कामः कां विरूद्धामवस्थां गन्ता गामी वर्तते । स क इत्याह । त्रिनेत्रमात्रेण रुषा कृत्वा यत् कृतं, तदेव तावन्मात्रं योऽद्यापि न संवृणोति, संक्षिपतीति प्रतीकारमात्रे लोकोक्तिरियम् । सहस्रं नेत्राणि यस्य तदपेक्षया यस्य त्रीणि नेत्राणि स न किञ्चिदेव । अतः सहस्रनेत्रकृतापेक्षया त्रिनेत्रकृतमपि न किञ्चिदेव ॥६३॥

पिकस्य वाङ्मात्रकृताद् व्यलीकान्न स प्रभुर्नन्दति नन्दनेऽपि ।
बालस्य चूडाशशिनोऽपराधान्नाराधनं शीलति शूलिनोऽपि ॥६४॥

पिकेन तिरश्चा वाग्मात्रेण कृतं यद् व्यलीकमपराधो न तु कायचेष्टया तस्माद्-हेतोः स प्रभुर्न्यायनिष्ठुरो नन्दने पुत्रेऽपि विषये न नन्दति, न हृष्यति । नन्दनस्य च पिकेन सह संबन्धो विद्यत एव । सहकारादिपल्लवमुकुलोल्लासहासहेतोः कुसुम-केतोर्मित्रस्य चैत्रस्य सर्वकालमस्यालङ्कारभूतत्वात् [3]। प्रभवो हि पुत्रस्याप्यपराधं न क्षमन्ते । तत्त्वतस्तु नन्दनाख्ये वने सहजोद्दीपन-[4][167-a]-विशेषात् कोकिला-लापकलिते विरहित्वात् कथमिव स नन्दतु । किञ्च । बालस्य शिशोश्चूडायां वर्तमानस्य शशिनोऽपराधाद् दूषणकरणात् भगवतः शूलिनो देवदेवस्याप्याराधनं नेच्छति । प्रभवो हि सापराधं गुरुं पितरमप्यवहेलयन्ति । तत्त्वतस्तु विरहित्वाद् देहदाहशङ्कयैव कनीयसोऽपि शशाङ्कस्य सान्निध्यं नित्यशुभिक्षुरूपस्य भगवतो विरूपाक्षस्य प्रायः सेवां न याति ॥६४॥

---

1. B. सायकः शरव्या. 2. B. om. सामीप्यम्. 3. B. प्रवालो. 4. B - दीपने.

तमोमयीकृत्य दिशः परागैः स्मरेषवः शक्रदृशां दिशन्ति । 

कुहूगिरश्चञ्चुपुटं द्विजस्य राकारजन्यामपि सत्यवाचम् ॥६५॥

स्मरेषवः कुसुममया बाणाः। कुहूगिरो दर्शवाचो द्विजस्य ब्राह्मणस्य चञ्चु-पुटमिव चञ्चुपुटं तपस्वित्वात् [1]लघुतरं मुखं राकारजन्यां पूर्णचन्द्रविशिष्टायामपि रात्रौ सत्यं वाचं करोति। कुहूरमावास्या, गिरि वाचि यस्य स कुहूगीस्तस्य। स ह्यसत् प्रतिग्रहनिवृत्तेः सत्प्रतिग्रहाभावात् प्रबलबुभुक्षाक्षामीकृतत्वेनान्धीभूतः सर्वं तमोमयं पश्यन् विशेषमविमृश्य राकामपि कुहूमेवाह। कुह्वां च सर्वथा चन्द्राभावः। किं कृत्वा सत्यवाचं दिशन्तीत्याह। शक्रदृशां संबन्धिनीर्दिशः परागैर्निजरेणुभिः कृत्वा तमोमयीकृत्य अन्धकारैकरूपाः[2] कृत्वा। एवं चैकदेशेन कुह्वाः सद्भावात् स[3] सत्यगीः। तत्त्वतस्तु कुहूरिति शब्दो गीर्वाग् यस्य कुहूरिति गिरति समुच्चरति वा कुहूगीर्द्विजः कोकिलः। तन्नादश्रवणात् मदनशरजर्जरितः सन् सहस्रेणापि दृग्भिः स प्रभुरन्धीभवतीत्यर्थः। अत्र पक्षे तु स्मरेषवः सामान्येन [4]वासन्तानि केवलानि कुसुमान्येव, तेषां [5]परागो विरहिणमन्धं करोत्येव। कोकिलासांनिध्याद् वसन्तप्राप्तिः ॥६५॥

शरैः प्रसूनैस्तुदतः स्मरस्य स्मर्तुं स किं नाशनिना करोति ।

अभेद्यमस्याहववर्म न स्यादनङ्गता चेद् गिरिशप्रसादः ॥६६॥

स इन्द्रः प्रसूनैः शरैस्तुदतो व्यथयतः स्मरस्याशनिना वज्रेण कृत्वा स्मर्तुं स्मृतिविषयतोऽयं किं न करोति। वज्रेण कृत्वा तं विनाशयत्येव। चेदस्याभेद्यमाहव-वर्म सङ्ग्रामयोग्यं तनुत्रं न स्यात्। किमाहववर्मेत्याह। अनङ्गता अमूर्तित्वम्। या अनङ्गता किं वस्त्वित्याह। गिरिशस्य भगवतः प्रसादः साक्षाच्छम्भोः प्रसाद एवानङ्गता, सा चाभेद्यं वर्म अस्ति। वज्रमायुधं विख्यातशक्तिकं शक्रस्य करे परं त्वनङ्गोऽङ्ग, स किं करोतु। कुसुमायुधवज्रायुधयोस्तु दूरमन्तरं शस्त्रशक्तिकृतम्। स्मरस्येति स्मृत्यर्थ कर्मणि षष्ठी। क्रिया क्रियार्थत्ता तु सङ्गतिमानेतव्या ॥६६॥

धृताधृते-[167.b]-स्तस्य भवद्वियोगादन्यान्यशय्यारचनाय भूर्जैः।

अप्यन्यदा[6]रिद्र्यहराः प्रवालैर्जाता दरिद्रास्तरवोऽमराणाम् ॥६७॥

---

1. B1. लघुतरमुखं 2. B. -रूपाः 3. B1. om. स. 4. B1, B. वासन्तानि 5. B. पुरागो. 6. B. -द्र-

त्वद्विरहाद् धृताधृते: स्थिरदुःखस्य० तस्येन्द्रस्यापरापरसंस्तरकल्पनाय ग्रोरितैः प्रवालैः कृत्वाऽन्यदारिद्र्यहरा अपि आत्मना तैः कृत्वा दरिद्रा जाताः। ते हि प्रवालैः कृत्वा परेषां दारिद्र्यं हरन्ति। अनेन च संविधानेन तैर्दरिद्रा जाता इति छलेनार्थः। तत्त्वतस्तु प्रवालैर्विद्रुमैरन्यदारिद्र्यहराः। प्रवालैः पल्लवैस्तु स्वेन दरिद्राः ॥६७॥

स्वैर्गुणास्फालभवैः स्मरस्य स्वर्नाथकर्णौ बधिरावभूताम्।
गुरोः शृणोतु स्मरमोहनिद्राप्रबोधदक्षाणि किमक्षराणि ॥६८॥

नन्वेवं व्यवहरन्तं तं गुरुरपि न शिक्षयतीत्याह। स्मरस्य धनुर्गुणटङ्कारजैः शब्दैः कृत्वा स्वर्नाथस्य शक्रस्य कर्णौ बधिरौ भूतौ। अत एव स्मरमोहनिद्राप्रबोधो जागरणं तत्र दक्षाणि पटूनि गुरोरक्षराणि किं शृणोतु। अपि तु नैव शृणोतु। निद्रालुः स्वभावाद् दुरवबोध्यो भवति। विशेषात् श्रुतिविफलः। तत्त्वतस्तु गुरुर्बृहस्पतिः। प्रबोधो हेयोपादेयज्ञानम्। गुरुर्गीष्पति (गीः पति) पित्राद्यौ। छलपक्षे सुप्तस्य पुत्रादेः प्रबोधयिता पितृमात्रादिः ॥६८॥

अनङ्गतापप्रशमाय तस्य कदर्थ्यमाना मुहुरामृणालम्।
मधौ मधौ नाकनदीनलिन्यो वरं वहन्तां शिशिरेऽनुरागम् ॥६९॥

स्वर्गजङ्गाकमलिन्यो मधौ मधौ प्रतिचैत्रं वरं साधु शिशिरर्तावनुरागं प्रेमानुबन्धं वहन्ताम्। तासां हि वसन्ते संसिद्धिसिद्धः प्रेमानुबन्धः। इदानीं तु वरं शिशिरे तं ता वहन्ताम्। यतः कीदृश्यः? तस्य कामसंज्वरहरणाय मृणालमामूलं कदर्थ्यमानाः समुपद्रूयमाणाः। अत्रापि प्रतिचैत्रमिति संबन्धः। मधुर्वसन्तोपलक्षणम्। तत्र च विरहिणः स्मरेणातीव बाध्यन्ते। वरमिति क्रियाविशेषणप्रतिरूपकमव्ययं पूर्वस्य महतोऽप्यरुचावपरस्य हीनस्यापि स्वीकारे यथा वरं कूपशताद्वापीत्यादि ॥६९॥

दमस्वसः। सेयमुपैति तृष्णा जिष्णोर्जगत्यग्रिमलेख्यलक्ष्मीम्।
दशां यदब्धिस्तव नाम दृष्टित्रिभागलोभार्तिमसौ बिभर्ति ॥७०॥

हे दमस्वसः। भैमि! सेयं जिष्णोरिन्द्रस्य तृष्णा महती स्पृहा जगति समस्ते विश्वे अग्रिमलेख्यलक्ष्मीं प्रथमलेखनीयश्रियमुपैति। तृष्णावत्तया जगति प्रथमं स एव लेखनयोग्य इत्यर्थः। ततोऽन्यो जगति तृष्णावान्नास्तीति यावत्। यत् कारणादसौ दशामब्धिः सन् *तव नाम* स्तोको यो दृष्टेस्त्रिभागस्तस्य लोभस्तस्यार्तिः पीडा, तां बिभर्ति। यस्य सहस्रं दृशः [169.a] स त्वत्तो मनाग् दृष्टेस्त्रिभागं ~~याचते~~

वर्ष्टीति समुत्कृष्टास्य तृष्णा दृष्टा। तच्चतस्तु दृष्टेस्त्रिभागः कटाक्षः। तृतीयो

भागस्त्रिभाग इति पूरणप्रत्ययोऽत्र समासे लुप्तो द्रष्टव्यः ॥७०॥

अग्न्याहिता नित्यमुपासते [1] यां देदीप्यमानां तनुमष्टमूर्तेः।
आशापतिस्ते दमयन्ति ! सोऽपि स्मरेण दासीभवितुं न्यदेशि ॥७१॥

अष्टमूर्तेर्भगवत[2] ईश्वरस्य यां देदीप्यमानामतिदीप्तिमतीं तनूं मूर्तिमग्न्याहिता [3]आहिताग्नयो दीक्षिताः शश्वदुपासते, सुश्रूषन्ते। अग्निमित्यर्थः। हे दमयन्ति ! सोऽप्येतादृश आशापतिः स्मरेण तव दासीभवितुं न्यदेशि, निदिष्टः। त्वं दमयन्त्या दासो भवेति सम्यगाज्ञप्तोऽस्तीत्यर्थः। सद् दूताः स्वामिनो दूषणानि पश्यन्तोऽपि जगति [4]अलिकया खलु दृष्यानि कृत्वा गुणानेव[5] पुरस्कुर्वन्तो दूत्यं कुर्वन्ति तेन गुणानेव महत्त्वहेतवोऽत्रोपक्षिप्ताः। पदार्थे वाक्यवचनं च कवेः प्रौढिः पदानां साभिप्रायता च। तद् द्वयं चात्रातीव विद्यते। अग्न्याहिता इत्यग्निशब्दस्य पूर्वनिपाते सत्याहिताग्नय एवाभिधीयन्ते। एवमग्रेऽपि दूतधर्मस्य सौष्ठवं वेदितव्यम्। वह्निरष्टमूर्तिमूर्तिः प्रसिद्धैव ॥७१॥

त्वद्गोचरस्तं खलु पञ्चबाणः करोति सन्ताप्य तथा विनीतम्।
स्वयं यथास्वादिततप्तभूयः परं न सन्तापयिता स भूयः ॥७२॥

भवद्विषयः कामो नूनं तं देवं सम्यक् तप्तं कृत्वा तथा विनीतं सुशिक्षितं करोति, यथा स्वयमात्मनापि आस्वादिततप्तभूयः समनुभूतसंदीपितत्वस्सन्[6] भूयः पुनः परं न सन्तापयिता, सन्तापयिष्यति। तेन हि सम्प्रति ज्ञातं यथेयं मम तापव्यथा तथा परस्यापि भवतीति विनीतं सुशिक्षितं करोतीति लोकोक्तिः। लोके हि दुर्विनीतनिग्रहे प्राय एतादृशी सोल्लुण्ठनोक्तिः। तप्तस्य भवनं तप्तभूयम्। आस्वादितं तप्तभूयं येन स तथा। आस्वादितप्रयोगेऽपि लोकोक्तिसमाश्रयणेनैवोल्लुण्ठना गर्भः[7]। त्वं गोचरो विषयो यस्य स त्वद्गोचरः ॥७२॥

अदाहि यस्तेन दशार्धबाणः पुरा पुरारेर्नयनालयेन।
स निर्दहंस्तं भवदक्षिवासी न वैरशुद्धेरधुनाधमर्णः ॥७३॥

---

1. B. यः, 2. B. -न्त. 3. B. om. आहित्ता-, 4. D. -लिकया.
5. B. गुणा एव. 6. B. समु-. 7. B, D. -गभः ?

तेनाग्निना पूर्वं पुरदहननयनवासिना सता स पञ्चशरो दग्धः। स पञ्चेषुर्भवदक्षिवासी भूत्वा तमग्निं निःशेषेण दहन् सन् अधुना वैरशुद्धैर्वैरनिर्यातनाञ्चाधमर्णो न ऋणी तेन हि सम्प्रति यथोचिता वैरशुद्धिः कृता। भवत्या अक्ष्णि वसतीत्येवंशीलो भवदक्षि-
-वासीति सर्वनाम्नो वृत्तिमात्रे पूर्वपदस्य पुंवद्भावः। तत्त्वतस्तु भवदक्षिवासी त्वत्कटाक्षसंश्रयः। भवदक्षि वासयतीति वा। वैर-[164.b]-शुद्धिः प्रतीकारः। अधमर्ण ऋणग्राहकोऽत्र तु ऋणप्रतीकारमात्रम् ॥७३॥

सोमाय कुप्यन्निव विप्रयुक्तः[1] स सोममाचामति हूयमानम्।
नामापि जागर्ति हि यत्र शत्रोस्तेजस्विनस्तं कतमं सहन्ते ॥७४॥

स वह्निर्हूयमानं मन्त्रपूर्वं क्षिप्यमाणं सोमं सोमनामानं यज्ञद्रव्यविशेषमाचामत्यु-
-पभुङ्क्ते। विप्रैर्ब्राह्मणैर्युक्तः[2] सन्। अथ च विप्रयुक्तो विरहितः। उत्प्रेक्षते[3]। सोमाय चन्द्रमसे कुप्यन्निव तमाचामतीति पूर्वेणान्वयः। ननु विरहितत्वाधस्तस्य सन्तापकारी सोमः। सोऽन्योऽयं चान्य एवेति विप्रयुक्तविशेषणविशिष्टो भूत्वा, तं किमाचामतीत्य-
-र्थान्तरन्यसनं प्राकरणिकार्थसमर्थनसमर्थम्। हि यस्माच्छत्रोर्नाममात्रं यत्र जागर्ति नितान्तप्रकाशं भवति, तं कतमं तेजस्विनः सहन्ते, अपि तु न कमपि प्रकृष्टम्। वह्निश्च तेजस्वी, तत्र च सोमस्य शत्रोरतीव स्पष्टं सोम इति नामास्त्येव। सोमाय कुप्यन्निति 'क्रोधार्थानां यं प्रति कोप' इति चतुर्थी ॥७४॥

शरैरजस्रं कुसुमायुधस्य कदर्थ्यमानस्तरुणि! त्वदर्थे।
~~अर्चे~~ अभ्यर्चयद्भिर्विनिवेद्यमानादप्येष देवः कुसुमाद् बिभेति ॥७५॥

हे तरुणि! एष देवोऽग्निर्भवन्निमित्तं कुसुमायुधशरैरर्थात् कुसुमैरेवानवरतं कदर्थ्यमानो बहुधा बाध्यमानः सन् वैश्वदेवावसरे पूजयद्भिर्ब्राह्मणादिभिरपि विनिवेद्यमानात्[4] कुसुमाद् बिभेति। 'यो हि दुग्धेन दग्धो भवेत्, स तक्रमपि फूत्कृत्य पिबति,। सर्पैर्भापितः पुमान् रज्जुतोऽपि बिभेति' इति लौकिकाख्यानवदेतदपि। देव इति विशेषणमत्र कुसुमपूजाहेतुत्वेन सार्थकं[5], तेजोरूपवह्निः कुसुमैः कथमिव पूज्यते तदधिष्ठानात् तु देवः पूज्यत एव ॥७५॥

---

1. B1. -मुक्तः. 2. ४. युक्तैः. 3. ४. उत्प्रेक्ष्यते. 4. B1. निवेध—
5. B1. साधकं.

स्मरेन्धने वक्षसि तेन दत्ता संवर्तिका शैवलवल्लिचित्रा।
चकास्ति चेतोभवपावकस्य धूमाविला कीलपरम्परेव ॥७६॥

अत्र देवमूर्तिं त्वमेव। स्मरस्येन्धनरूपं यद् वक्षस्तत्र तेनाग्निना दत्ता, धृता संवर्तिका कमलनवदलं शैवालमञ्जरीसंवलिता सती चकास्ते। उत्प्रेक्ष्यते। चेतोभवो मनोभूरेव पावकस्तस्य धूमेनाविला कलुषिता कीलपरम्परा ज्वालाश्रेणिरिवेत्युत्प्रेक्षेयमुपमा वेति। न वयमत्र निर्णये समर्थाः। तत् सहृदयैरेव विनिश्चेतव्यम्। संवर्तिका नवदलम्। 'वह्नेर्द्वयोर्ज्वालकीलौ'। स्मरेन्धने वक्षसीत्यत्र स्मरशब्देनैव चेतोभवपावकलब्धिश्चेत् तत्र ब्रूमः। स्मरेन्धन इत्यनेनान्तरस्थस्मरकृतातिज्वलनस्यानुभूय-[१८१-८]-मानत्वाद् वक्षस इन्धनत्वम्। अत एव च हेतोश्चेतोभवो मनसि स्थितो यो वह्निस्तस्य प्राप्तिः। लिङ्गदर्शनाद् विलिङ्गिप्रतीतिर्भवत्येव। न हि लिङ्गिनमर्थं विना प्रायो लिङ्गस्यावस्थितिः॥७६॥

पुत्री सुहृद्येन सरोरुहाणां यत्प्रेयसी चन्दनवासिता दिक्।
धैर्यं विभुः सोऽपि तवैव हेतोः स्मरप्रतापज्वलने जुहाव ॥७७॥

सरोरुहाणां श्रीगृहाणां शैत्यसौरभ्यपावनत्वं प्रसिद्धानां सुहृत्सहजं मित्रं नभो-मणिर्यदत्रयमूर्तिरर्थात् सूर्यो येन कृत्वा पुत्री पुत्रवानिति प्रशंसायामिन्। किञ्च, यस्य प्रेयसी प्रियतमा रुचिपात्रं कलत्रं चन्दनैर्मलयजैर्वासिता सुरभिता दिग् आशा नायिका सोऽपि विभुः स्वामी तवैव हेतोर्भवत्या एव कारणाद् धैर्यं सत्त्वं स्मरप्रताप एव ज्वलनस्तत्र जुहोति स्म। यद् वस्तु ज्वलने हूयते तद् भस्मीभूयाभावमेव भजते। चन्दनवासितेति तच्चपक्षे चन्दनैर्मलयजतरुभिर्वासिता विहितस्थितिः। ते हि तत्र वसन्ति। पितुर्गुणवर्णने पुत्रस्य गुणा वर्णिता एव, पुत्रस्य पितुरेवावतारात्। प्रिया-भोगवर्णनेन च प्रियस्य भोगा वर्णिताः। तस्या भोगानां तदधीनत्वात्। ईदृग्विधा नायिकासम्पत्तिश्च सूचिता ॥७७॥

तं दह्यमानैरपि मन्मथेधं हस्तैरुपास्ते मलयः प्रवालैः।
कृच्छ्रेऽप्यसौ नोज्झति तस्य सेवां सदा यदाशामवलम्बते यः ॥७८॥

[1]मलयानाम चन्दनो इन्धनोत्पत्तिभूमिर्नगस्तं देवं मन्मथवह्नेरिन्धनभूतं *दह्यमानैः [2]दन्दह्यमानैर्ज्वाज्वल्यमानैरपि शय्यार्थमवचितैः प्रवालैः पल्लवैरेव हस्तैरुपास्ते, पल्लवरूपैर्हस्तैः कृत्वा सेवते। [3]अन्योऽपि सेवको हस्ताभ्यामेव सेवते। अचितमेव।

1. B1. om. मलयानाम चन्दनो. 2. B1. om. दन्धमानैः. * .B. दन्धमानैः प्रवालैः पल्लवैरेव हस्तैरुपास्ते। . B1. दह्यमानैर्ज्वाज्वल्यमानैरपि शय्यार्थमवचितैः पल्लवरूपैर्हस्तैः कृत्वा सेवते।
3. B. om. अन्योऽपि ---- सेवते। अचितमेव।

[1] मन्मथैधमान एव दह्यमानैः। युक्तोऽयमर्थः। [2] यः कश्चिद्यस्याशां नूनमहमेतदाश्रयेण वर्तयिष्यामी-न्त्याशंसामवलम्बते, हठं कृत्वा गृह्णाति, स [3] तस्य सेवां कृच्छ्रे [4] दुःखहेतुभूतेऽपि समये नोज्झति। प्रवाला हि तदाश्रयाः। उपाङ्गनिर्देश चाङ्ग(या)मात्यैव [5] गहनसन्देहेऽपि सति नोज्झति। नन्त्वतस्तु मलयस्तस्य [6] दिशमवलम्बमानः संश्रयन् दृश्यत एव। मलयशब्देनात्र तदङ्गभूताश्चन्दनतरवो गम्यन्ते, प्रवाला हि तदाश्रयाः, उपाङ्गनिर्देशे [7] चाङ्गमायात्येव ॥७८॥

B1. * तं दह्यमानैरिति। ज्वाज्वल्यमानत्वात् मदनेन्धनं तं यमं तस्य मदनेन्धनत्वात् एवातिशयेन ज्वाज्वल्यमानैरपि शय्यार्थमवचितैः पल्लवरूपैर्हस्तैः कृत्वा मलयाचलः सेवते, अन्योऽपि सेवको हस्ताभ्यामेव सेवते। उचितमेव यः सदा यत् संबन्धिनी तृष्णां धारयति, यो यदधीन इति यावत् स तस्य सेवया स्वस्य कष्टे जायमानेऽपि तस्य सेवां न त्यजति। अदःपरस्मिन्निति वचनाद्साविन्त्यस्य स इत्यर्थः। अयमपि सदा यमाशामवलम्बते। यतस्ततो हेतोर्हस्तसन्तापे सत्यपि सेवां चक्र इत्युचितमित्यर्थः। यो यदधीन जीविनिकः स तस्यैव कृच्छ्रेऽपि दारिद्र्येऽपि तस्य सेवां करोति। उचितमिति कश्चित्। असौ मलयः कृच्छ्रेऽपि तस्य सेवां नोज्झति। असौ यस्सदा तस्याशामव-लम्बत इति। केचित् 'तदाशाम्' इति पाठमवलम्ब्येति व्याचक्षते, तं दह्यमानैरप्युपास्ते इत्यनेनैव गतार्थत्वादुपेक्ष्यम्। रूपकानुप्रासार्थान्तरन्यासाः। एधशब्दोऽकारान्तोऽप्यस्ति ॥७८॥* [उपरलीनी टीका शेषीजी] B1.

स्मरस्य कीर्त्येव सितीकृतानि तद्दोःप्रतापैरिव तापितानि।
अङ्गानि धत्ते स भवद्वियोगा[द्धे]तू पाण्डुनि चण्डज्वरजर्जराणि ॥७९॥

स देवो भवद्वियोगाख्य हेतोः पाण्डूनि चण्डज्वरजर्जराणि शिथिलान्यङ्गानि धत्ते। तत्र विशेषणद्वयेऽपि यथासङ्ख्यं हेतुद्वयमुत्प्रेक्ष्यते। स्मरस्य कीर्त्येवासितानि सितानि कृतानि सितीकृतानि। तस्य स्मरस्य दोषोर्बाह्वोः प्रतापैरिव तापितानि इति ॥७९॥

स तन्वि! भर्ता घुसृणेन सायं दिशः समालम्भ-[१६१·७]-नकौतुकिन्याः।
तदा स चेतः प्रणिधाय तुभ्यं यदा गतो नैति निवृत्य पान्थः ॥८०॥

हे तन्वि! स देवस्तुभ्यं तदा तस्मिन्काले तिथिनक्षत्रवारमुहूर्तलक्षणे चेतः चित्तं प्राहिणोद् यदा गतः सन् पान्थः पुनः स्वस्थानं नायाति। स क इत्याह। योऽपराह्-सन्ध्यायां कुङ्कुमेन विलेपनकुतूहलिन्या दिशो भर्ता वरुण इत्यर्थः। सायं हि सैव नितान्तं लोहिनी भवति। वाक्यार्थस्य अभिप्रायता पूर्ववदतिशृङ्गारित्व द्योतिका ॥८०॥

1. B1. om. मन्मथैधमान----अर्थः। 2. B1 यो यदधीनश्चैनं जानात्यहं तदाश्रयेण. 3. B1. च यः, 4. B om. अपि समये नोज्झति. 5. B1. om. आयात्येव. 6. B तस्यां. 7. B1 निर्देशे

तथा न तापाय पयोनिधीनामश्वामुखोत्थः क्षुभितः शिखावान् ।
निजः पतिः सम्प्रति वारिपोऽपि यथा हृदिस्थः स्मरदाह(ताप-)दुःस्थः ॥८१॥

अश्वामुखोत्थः शिखावान् वह्निः क्षुभितः सञ्ज्वलितः सन्, पयोनिधीनां तथा न तापाय, यथा वारिपोऽपि सन्, निजः पतिर्वरुणः सम्प्रति हृदिस्थः क्रोडमध्ये वर्तमानः स्मरताप-दुःस्थत्वात् तापाय । अन्योऽपि वह्निस्तापाय प्रसिद्धः । किं पुनर्वडवानलः ? सोऽपि च क्षुभितः, प्रकुपितः । यो वारिपस्तेन पयोनिधयः पालनीया, न क्षयं नेयाः । तापेन वारिणां क्षयः प्रसिद्ध एव । दुःखेन तिष्ठतीति दुःस्थः । स्मरतापेन दुःस्थः ॥८१॥

यत्प्रत्युत त्वन्मृदुबाहुवल्लीस्मृतिस्रजं गुम्फति दुर्विनीता ।
ततो विधत्तेऽधिकमेव तापं तेनाश्रिता शैत्यगुणा मृणाली ॥८२॥

ननु तस्य जलेश्वरत्वात् जलजातानि वस्तूनि, तापहराणि वस्तूनि स्वाधीनान्येव, तत्किमिति तेषु[1] सत्स्वपि स एवं तापव्यथामनुभवतीत्याह । शैत्यगुणा च्छैत्यमस्या अधिकमस्तीति कृत्वा[2] तेनाश्रिता तमवलम्बिता[3] सती, मृणाली ततो हेतोस्तापमधिकमेव विधत्ते[4], न तु ह्रसयति । तत्[5] कुत इत्याह । यतः सा दुर्विनीता दुःशीला प्रत्युत प्रतीपं तव मृद्व्यौ द्वे[6] बाहुवल्ल्यौ तयोः स्मृतिस्तस्याः स्रजं मालां गुम्फति, सृजति । तथा च तापोऽधिक एव भवति । स्मृतिस्रजमित्यनेन स्मृतेः कुसुमत्वमायातम् । स्मृतिर्हि बाहुवल्लीतो जाता, वल्लीतः कुसुमसम्भवो[7] युक्त एव । बाह्वोश्चातिसौकुमार्यात् वल्लीत्वम् । एवमन्यद्-प्यभ्यूह्यम् । कवेरस्याशय अतीव दुर्लक्ष्यः । दुर्विनीतश्च स्वं परं च न जानाति । स्वभावात् सर्वानुद्वेजयत्येव ॥८२॥

न्यस्तं ततस्तेन मृणालदण्डखण्डं बभासे हृदि तापभाजि ।
तच्चित्तमग्नैर्मदनस्य बाणैः कृतं शतच्छिद्रमिव क्षणेन ॥८३॥

ततस्तेन वक्षसि दत्तं बिसशकलं शुशुभे । उत्प्रेक्ष्यते[8] । तन्मनः प्रविष्टैः कामस्य शरैरिव क्षणमात्रेण छिद्रशतयुक्तं कृतम् । स्वाभाविकस्यैव सच्छिद्रशतस्येत्थं सांनिध्यात् सम्भावना ॥८३॥

इति त्रिलोकीतिलकेषु तेषु मनोभुवो विक्रमकामचारः । [170.a]
अमोघमस्त्रं भवतीमवाप्य मदान्धतानर्गलचापलस्य ॥८४॥

---

1. Bl. om. तेषु. 2. Bl. om. कृत्वा. 3. B. स. 4. Bl. विधत्से.
5. Bl. ततो. 6. B. ये. 7. Bl. सं--. 8. Bl. उत्प्रेक्षते.

एवं प्रधानत्वात् तेषु त्रिभुवनभूषणेषु कामस्यातिशक्तितः स्वैरवृत्तिरस्ति। कीदृशस्य? त्वां सफलमङ्गमासाद्य दर्पान्ध्यनिरन्तरप्रसरशक्तेः ॥८४॥

सारोत्थधारेव सुधारसस्य स्वयंवरः श्वो भविता तवेति ।

सन्तर्पयन्ती दमयन्ति! तेषां श्रुतिः श्रुती नाकजुषामयासीत् ॥८५॥

हे भैमि! अथेति श्रुतिर्लोकोक्तिः। सम्यक् तोषयन्ती सती, तेषां नाकजुषां देवानां श्रुतीरयासीत् कर्णानगात्। इति कथमित्याह। श्वः आगामिनि प्रभाते तव स्वयंवरो भविता, भविष्यतीति। सा श्रुतिः किं वस्त्वित्याह। उत्प्रेक्ष्यते। सुधारसस्य सारभूता धारा वेणिरिव। सुधा सामान्येनैव परं सन्तर्पयति, सन्तोषयति। तस्यास्तु सारभूता धारा किं कथ्यते। सन्तर्पयन्ती कर्णौ प्रविश्य परम्परया तानेव ॥८५॥

समं सपत्नीभवदुःखतीक्ष्णैः स्वदारनासापथिकैर्मरुद्भिः ।

अनङ्गशौर्यानलतापदुःस्थैरथ प्रतस्थे हरितां मरुद्भिः ॥८६॥

अथ हरितां मरुद्भिर्दिशां देवैः प्रतस्थे प्रस्थानं कृतम्। कीदृशैः? कामदहनोष्म-व्याकुलैः। कथं प्रतस्थे समं सहैव। कैः? । निजकलत्रनिःश्वासरूपैर्मरुद्भिर्वातैः सह। तैरपि कीदृशैः सपत्नी भाविनी सम्भाविता या सपत्नी समानपतिका नायिका, ततो भवति यत् तस्माद् दुःखात् तीक्ष्णैरुष्णैरित्यर्थः। तीक्ष्णैः खरैर्वा। अर्थभेदे शब्दपौन-रुक्त्यमन्योक्तिप्रत्युक्तिभङ्ग्या गुण एव ॥८६॥

अपास्तपाथेयसुधोपयोगैस्त्वच्चुम्बिनैव स्वमनोरथेन ।

क्षुधं च निर्वासयता तृषं च स्वादीयसाऽध्वा गमितः सुखं तैः ॥८७॥

तैरध्वा सुखमनायासेनैव गमितोऽतिवाहितः। तत्र हेतुमाह। क्षुधं बुभुक्षां, तृषं पिपासां च निर्वासयता, सर्वथा विश्लेषयता स्वादीयसा स्वादिष्ठेन त्वच्चुम्बिना भवदाश्रितेन स्वमनोरथेनैव कृत्वा। तद्वशात् तैर्मार्गश्रमो न ज्ञात इत्यर्थः। अत एव कीदृशैः? अपास्तः सन्त्यक्तः पाथेयसुधारसस्य शम्बलामृतद्रवस्योपयोगो भोजनपानलक्षणो यैः। सुधया हि भोजनं पानं च भवति। कक्षापोट्टलिकीकृतापि सुधा क्वापि विलम्ब्य तैर्नोपयुक्तेत्यर्थः। सुधा हि स्वाद्वी स्वमनोरथस्तु स्वादीयान्। मोदक-लाभे हि कः सक्तून् भुङ्क्ते पथि ग्रीष्मं विना। ग्रीष्म एव हि सक्तवः प्रशस्यास्तत्रापि सशर्कराः। तथा च ऋतुचर्यायां ग्रीष्मचर्यायां ग्रीष्मावसरे उक्तम्—"लिह्यात् सक्तून् सशर्करान्" इति। एवमन्यत्रैव सुधाया उपयोगः शस्यः। त्वच्चुम्बि पाठान्तरम्। भुवोऽध्वा यो मार्गः पृथ्वीं प्रयाति ॥८७॥

देवीं मनोभूशरदावदाहे दिवं त्वदर्थे-[१७०-६]-न निमज्जयद्भिः।
सुरेषु सारैः क्रियतेऽधुना तैः पादार्पणानुग्रहभूरियं भूः ॥८८॥

1 अनन्तरं तैर्देवैः सम्प्रतीयं भूः चरणन्यासप्रसादपात्रं क्रियते। किं कुर्वद्भिः ? । दिवं देवीं भवत्याः प्रयोजनात् कामेषुतापे क्षिपद्भिः तेषां देवानां पतिपत्नीव्यवहाराद् द्यौ देवीत्वम्। अत एव तद् धर्मारोपणं दिवं विहाय त्वत्कृते सम्प्रति क्षितिपृष्ठे तिष्ठन्तीत्यर्थः।

* [देवीमिति। प्रियामिति। त्वन्निमित्तं स्वप्रेयसीरिन्द्राणीप्रमुखा देवीः कामबाण लक्षण एव वनवह्निस्तज्जनितसन्तापे नितरां मग्नाः सुतरां मदनपीडिताः कुर्वद्भिर्देवश्रेष्ठैरिन्द्रादि-भिरिदानीमसौ भूमिश्चरणस्थापनरूपकृपास्पदं क्रियते, तेषां चरणौ भूमौ न लगतः परं तदपि तैः कृतमिति तस्याः प्रसादः इदानीं ते भूमौ वर्तन्ते, तेषां यात्रागमनाद् देवीनां विरहसन्तापः। 'प्रिया देवं' इति च पाठे देवानामेव प्रियां' इति व्याख्येयम्। रूपकानुप्रासौ।]

→ अलङ्कृतासन्नमहीविभागैरयं जनस्तैरमरैर्भवत्याम्।
अर्पितो ऽङ्कमलेखलक्ष्मीं निक्षिप्य सन्देशमयाक्षराणि ॥८९॥

तैरमरैर्भूषितनिकटभूप्रदेशैः सद्भिरयं मल्लक्षणो जनो निजसेवको भवत्यां विषये ऽङ्कमस्य चलस्य लेखस्य भूर्जस्य श्रियं लम्भितः। किं कृत्वा ? सन्देशरूपान् वर्णान् संस्थाप्य। ऽङ्कमलेखलक्ष्मीमित्यनेन सामान्यलेखतोऽस्य विशेषं दर्शयति ॥८९॥.

प्रत्येकमेते परिरभ्य पीनस्तनोपपीडं त्वयि संदिशन्ति।
त्वं मूर्छतां नः स्मरभल्लशल्यैर्मुदे विशल्यौषधिवल्लिरेधि ॥९०॥.

एते चत्वारोऽपि प्रत्येकमेकं प्रति स्तनौ पीडयित्वा समालिङ्ग्य संदिशन्ति निज-स्वरूपमावेदयन्ति। कथं तदाह। त्वं नोऽस्माकं विशल्यानाम्नी औषधिवल्लिरेधि भव। कीदृशानाम् ? प्रसूनाशुगस्य भल्लो बाणाग्रवर्ती छुरिकाकारो लोहस्तदेव शल्यं मर्मव्यथकं वस्तु तज्जुषां, तेन सशल्यामित्यर्थः। विशल्या हि शल्यहरणत्वात् सा विशल्यौषधिवल्लिरिति व्यस्तं समस्तं वा ॥९०॥.

त्वत्कान्तिमस्माभिरयं पिपासन्मनोरथाश्वासनयैकयैव।
निजः कटाक्षः खलु विप्रलभ्य; कियन्ति यावद्भ्रमण वासराणि ॥९१॥.

1. B1. om. अनन्तरं ----तिष्ठन्तीत्यर्थः। * B1. देवीमिति ----रूपकानुप्रासौ।
B1. remark → ए काव्यनो अर्थ शेषटीकाए लिख्यो छे, वल्लभटीनो न लिख्यो हतो में।

तमेव सन्देशं वितानयति। कथय अयं निजः कटाक्षोऽस्माभिः कियन्ति वासराणि यावत् खलु निश्चयं [1]अवश्यं [2]प्रदर्श्य [3]विप्रलभ्यः प्रतारणीय इति काकुगर्भं वचनम्। किं कर्तुमिच्छन्? तव कान्तिं पातुमिच्छन्। कया वञ्चनीय इत्याह। एकया केवलया मनोरथेन मनोरथ एव वा आश्वासनावष्टम्भस्तथैव ॥९१॥

अनुग्रहोऽस्मासु यदि त्वदीयस्तदेहि देहि द्रुतमङ्गपालीः।
चार्वङ्गि! निर्वापय तापमङ्गैरनङ्गलीलालहरीतुषारैः ॥९२॥

यद्यस्मासु विषये तव प्रसादोऽस्ति तद्द्रुतं त्वरितमेव एह्यागच्छाङ्कपालीर्देहि आलि-
-ङ्गनानि प्रयच्छ। हे चार्वङ्गि! सर्वाङ्गसुन्दरि! निजाङ्गैः कृत्वाऽस्माकं दाहमुपशमय। किं रूपैरङ्गैः? कामकेलिवीचितुषारैः शीतलैः। अनङ्गलीला सुरतकेलिस्ता एव लहर्य-
-स्ताभिस्तुषा-[171-a]-रैरिति वा ॥९२॥

दयस्व किं घातयसि त्वमस्माननङ्गचण्डालशरैरदृश्यैः।
भिन्ना वरं तीक्ष्णकटाक्षबाणैः प्रिये! तव प्रेमरसात्पवित्रैः ॥९३॥

हे प्रिये! दयस्व, दयां कुरु। अनङ्ग एव चण्डालस्तस्यादृश्यैः शरैः प्रयोज्यैः कर्तृभिस्त्व-
-मस्मान् किं घातयसि, किमर्थं मारयसि। अनङ्गो हि छिन्नाङ्गुल्यानङ्गत्वात् चण्डालः। स चास्पृश्य एवापावनत्वात्। चण्डालश्च प्रायेण चौरत्वाददृश्यीभूता एव घ्नन्ति। तेषां
-चादृश्यत्वाद् अदृश्यागतानां शराणामप्य[4]दृश्यत्वादपावनत्वम्। तव कटाक्षा एव बाणा-
-स्तैर्विद्धा भिन्नाः सन्तो वयं वरं श्लाघ्याः। कीदृशैः? प्रेमरसात् पवित्रैः। स चण्डाल-
-स्त्वं च प्रिया। तस्य शरा अदृश्यघातकत्वादतीवापवित्राः। तव कटाक्षबाणास्तु प्रेमरसधौतत्वाद् विशेषतः पवित्राः। रसो द्रवद्रव्यं, तेन पावित्र्यं भवत्येव। प्रेमरसस्य तु सुधारसतोऽपि प्राधान्यं; प्रिया क्रीडेऽपि क्रीड इति। (क्रीडति)। चण्डालः स्पृश्यतेऽपि नेति महान्विशेषः ॥९३॥

त्वदर्थिनः सन्तु परस्सहस्राः प्राणास्तु नस्त्वच्चरणप्रसादः।
विशंकसे कैतवनर्तितं चेदन्तश्चरः पञ्चशरः प्रमाणम् ॥९४॥

भवद्याचकाः परःसहस्राः सहस्रात्परे असङ्ख्याः सन्तु। अस्माकमसवः पुनर्भवत्पद-
-प्रसाद एव। त्वामेव प्राप्य सम्प्रति जीवितमेषामित्यर्थः। यदि कपटाभिनयनं सम्भावयसि तदत्रार्थेऽन्तश्चरो मध्यवर्ती पञ्चशरः पञ्चशरोपलक्षितः मौढो धनुर्धरः प्रमाणं प्रमाता

1. B om. अवश्यं 2. B1 om. प्रदर्श्य 3. B om. विप्रलभ्यः 4. B -दृश्यतमेव.

1 अव्यभिचारस्थापक इत्यर्थः। प्रौढो हि प्रतिभूः क्रियते। तत्त्वपक्षस्तु सुबोध एव। 'प्रमाणी हेतुमर्यादाशास्त्रे यत्ताप्रमातृषु'। 'परःशताद्यास्ते येषां परा सङ्ख्या शताधिका' ॥९४॥

अस्माकमध्यासितमेतदन्तस्तावद्भवत्या हृदयं चिराय।

बहिस्त्वयालंक्रियतामिदानीमुरो मुरं विद्विषतः श्रियेव ॥९५॥

हे प्रिये! अस्माकमेतद्हृदयमन्तर्मध्ये भवत्या बहुकालमधिष्ठितमस्ति। इदानीं त्वया बहिर्बाह्ये उरो वक्षोऽलंक्रियताम्। कथेव कस्येत्याह। श्रिया मुरं विद्विषतो मुरारेरिव। यथा श्रिया मुरारेरुरो बहिरलंक्रियमाणमस्ति। भवत्या त्वयेति पौनरुक्त्यमत्रानर्थकं चेत् तर्ह्येवं व्याख्येयम्। अन्तर्भवत्या चिन्तारूपया अमूर्तयाधिष्ठितमस्ति। इदानीं त्वयेत्यन्यया प्रत्यक्षमूर्तया उरोऽलंक्रियतामिति त्वयाशब्दोऽन्यार्थः। अमूर्तस्याप्यधिष्ठातृता भवति, यथा प्रतिमादौ देवानाम्[2]। अलङ्कारत्वं तु प्रायो मूर्तानामेव। मूर्तेनोपमानेन चोपमेयस्य ~~मूर्ति~~ मूर्तत्वमाक्षिप्तम् ॥९५॥

दयोदयश्चेलसि चेत्तवाभूदलंकुरु द्यां विफलो विलम्बः।

क्ष्मामेव दे-[।ना।ल]-वालयतां नयामो भूमौ रतिश्चेत्तव जन्मभूमौ ॥९६॥

यदि तव मनसि दयाया उदयोऽभूदर्थादस्माकमुपरि त्वरितं दिवं भूषय, कालक्षेपो वृथा। जन्मभूमित्वाद्यदि भूमावेव तव रतिः सन्तोषस्तर्हि क्ष्मामेव देवालयतां ध्रुवं प्रापयामः। वयं चेत् क्ष्मायामुषितास्तर्हि सा देवालयः सम्पन्नैव। वाक्यार्थानां पृथक्त्वात् पौनरुक्त्यं न दोषः। जन्मभूशब्दः स्मरध्वजपर्यायोऽपि लोके संवीतत्वादत्र न दोषः। अयं कविः प्रायो लोकोक्तिसमाश्रयणेन खण्डखण्डमेव वाक्यं प्रयुङ्क्ते ॥९६॥

धिनोति नास्मान् जलजेन पूजा त्वयान्वहं तन्वि! वितन्यमाना।

तव प्रसादोपनते तु मौलौ पूजाऽस्तु नस्त्वत्पदपङ्कजाभ्याम् ॥९७॥

हे तन्वि! प्रतिवासरं त्वया जलजेन सामान्येन पङ्कजेन कृत्वा वितायमाना (वितन्यमाना) क्रियमाणा पूजा अस्मान्न प्रीणयति तव प्रसादनायोपनतेऽग्रे लुठिते[3] नोऽस्माकं मौलौ तव पदपङ्कजाभ्यां पुनरस्तु। जलजेनेति जातावेकवचनम् ॥९७॥

स्वर्णैर्वितीर्णैः करवाम वामनेत्रे भवत्या किमुपासनासु (—नाभिः)।

अङ्ग! त्वदङ्गानि निपीतपीतदर्पाणि पाणिः खलु याचते नः ॥९८॥

1. B. अव्यभिचार— 2. B. देवतानाम् 3. B. प्रसादनायोपनते.

हे वामनेत्रे! उपासनाभिः परिचर्यारूपैः त्वया दत्तैः कनकैः किं करवाम। अपि तु न तेषामवसरः। तर्हि कां पूजां कामयध्वे इत्याह। अङ्ग! भोः खलु निपीतो नासितः पीतस्य गोदन्ताख्यहरितालस्य दर्पो यैरेवंभूतानि तवाङ्गानि नोऽस्माकं पाणिर्याच्यते। लोभेन प्रसृतः सन् मार्गयते। पीतं सुवर्णं एव वा। पीतानां हरिद्रादीनां सहजगौरवस्तूनां वा दर्पः, अन्यो हि पीतिमा कृत्रिमः ॥९८॥

वयं कलादा इव दुर्विदग्धं त्वद्गौरिमस्पर्धि दहेम हेम।
प्रसूननाराचशरासनेन सहैकवंशप्रभवभ्रु! बभ्रु ॥९९॥

हे प्रसूनानि नाराचा लोहबाणा यस्य तस्य शरासनं धनुस्तेन सहैकस्मिन्वंशे त्वक्-सारे प्रभवो ययोस्ते तथा भ्रुवौ यस्यास्तस्याः प्रबोधनं 'प्रसूननाराचशरासनेन सहैकवंशप्रभवभ्रु' इति सर्वसमुदायेन सम्बोधनार्थः। स्मरशरासनभ्रु इत्यर्थः। पदानां साभिप्रायत्वान्नात्रासम्मितत्वं दोषः। अथ च वंशोऽन्वयः। प्रथमपक्षे तु शरासनस्य प्रायो वेणुसम्भवादेव तथा व्याख्यातम्। तदेकवंशजत्वं तु तत्सदृशकार्यकरणात्। वयं दुर्विदग्धं दुःशिक्षितं हेम सुवर्णं बभ्रु कपिशं दहेम ज्वलयेम। तेन नैव नः कार्यमित्यर्थः। यतः कीदृक्? तव गौरिमा गौरभावेन स्पर्धत इत्येवंशीलम्। तव गौरत्वस्य हेम्नश्च [११२-६] द्विजचण्डालयोरिव दूरमन्तरम्। तथापि त्वद्गौरिम्णा(मा) सह स्पर्धत इति दुर्विनीतं तत्। भाषानयने द्रव्यानयनमिति न्यायात् गौरिमविशिष्टा भैमी प्राप्यते। क इव दहेम इत्याह। कलादा इव। स्वर्णकारा यथा दुष्टविशेषेण दग्धं पक्वं दहन्ति। दहेमेति सप्तमीलोकोक्ति-समाश्रयणेन काकुगर्भैषमुक्तिः। बभ्रिवति निन्दागर्भं विशेषणम् ॥९९॥

सुधासरःसु त्वदनङ्गतापः शान्तो न नः किं पुनरप्सरःसु।
निर्वाति तु त्वन्ममताक्षरेण सुनाशुगेषोर्मधुशीकरेण ॥१००॥

न च वक्तव्यं स्त्रीरत्नभूता अप्सरसः सन्त्येव भवतामधीनास्ताभिरेव भवन्तः किमि-त्येवंरूपं स्मरज्वरं न प्रतिकुर्वन्तीत्याशङ्क्याह। सुधासरस्स्वमृतकासारेषु तवानङ्गतापो नोऽस्माकं न शान्तो निवृत्तः किं पुनरप्सरःसु स्वर्वेश्यासु अथ चाप्सु सरःसु। सुधा-पेक्षया हि जलं गुणैरतीव कनीयः। त्वन्ममताक्षरेण तु निर्वाति समुपशाम्यति। ममेत्यस्य भावो ममता स्वीकारबुद्धिस्तद्वर्णमात्रेणाल्पप्रयत्नसूचकमेतल्लोकोक्तिस्वरूपम्। ममता-शब्देन संबन्धिनाममात्रं वा तस्याक्षरं वर्णमात्रं स्वस्वामिभावसूचकवर्णमात्रेणेत्यर्थः। किं-वस्तुना तेनेत्याह। सुनाशुगेषोः पुष्पशरशरस्य मकरन्दबिन्दुना मम यूयमित्येतावतैव तव वचनेन वयमतीव निवृता भवाम इत्यर्थः ॥१००॥

खण्डः किमु त्वद्गिर एव खण्डः किं शर्करा तत्पथशर्करैव।

कृशाङ्गि! तद्भङ्गिरसोत्थकच्छतृणं तु दिक्षु प्रथितं तदिक्षु ॥१०१॥

हे कृशाङ्गि! नूनं खण्ड इक्षुरसविकारभेदः तव वाचः खण्डो लेश एव तस्मात् तव वाचोऽग्रे तन्न किञ्चित्। शर्करा इयमपीक्षुभेदः सितानाम्नी। साऽपि किं तदग्रे साऽपि न किञ्चित्। यतस्तस्यास्त्वद्गिरः पन्थास्तत्पथस्तस्य शर्करा सिकतेति तन्मार्गस्यैव वालु-केत्यर्थः। तदिक्षु दिक्षु प्रथितं सर्वेषु देशेषु पुण्ड्रकान्तादिभेदैर्विख्यातं तस्यास्त्वद्गिरो या भङ्गी रचना, तस्या रसस्तत्र तत्समीपे उत्था यस्य तदेवंरूपं कच्छतृणमनूपजस्वर-विशेषः। कच्छतृणानि रससमीपे उत्तिष्ठन्त्येव। खण्डशर्करानिदानं यदिक्षुत्वं गिरोपेक्षया तदपि न किञ्चिदेवेत्यर्थः ॥१०१॥

दशाम किं ते सुधयाऽधरेण त्वदास्य एव स्वयमास्यते हि।

विधुं विजित्य स्वयमेव भावि त्वदाननं तन्मखभागभाग्धि ॥१०२॥

कन्यावरणावसरेऽपरत्र वा गान्धर्वविवाहे प्रकटं गूढं च खण्डशर्करादिपुष्कलं दीयते। अन्यच्चेक्षुरण्डादि मृष्टं वस्तु। तत्र तावत् पूर्वदर्शितरीत्या तेषामवकाशः सुधाधिका ते-[172-6]-भ्यो वा साऽस्त्यस्मदधीना। तत्र चैवं तेऽन्यत् किं दशाम। यस्मात् सुधयाऽधरेण साक्षादमृतेन रदच्छदेन त्वदास्ये भवन्मुख एव स्थीयते। चन्द्रोऽस्ति सुधाधारस्तत्राप्येवम्। चन्द्रमसं विजित्य तस्य मखभागं यज्ञांशं भजतीति तन्मखभागभाक् तथाभूतं[1] स्वयमात्मनैव भवन्मुखं भविष्यति। यो हि यं जयति, स तस्य भुक्तिं भजत एव। सामान्यममृतं चन्द्राधारमधररूपेण तवैव मुखेऽस्ति। द्वितीयं यदि शिष्टममृतं यज्ञशेषलक्षणं, तस्य लब्धिस्त्वेवं भविष्यत्य-स्येति भावः। जये विधोर्भविष्यता क्रमेण तस्य जेष्यमाणत्वात् ॥१०२॥

प्रिये! वृणुष्वामरभावमस्मदिति त्रपोदञ्चि वचो न किं नः।

त्वत्पादपद्मे शरणं प्रविश्य स्वयं वयं येन जिजीविषामः ॥१०३॥

हे प्रिये! त्वमस्मत्सकाशादमरत्वं वृण्विति नो वचनं किं न त्रपाकरम्। अपि त्वस्मा-कमीदृशी वाग् लज्जाहेतुरेव। येन हेतुना भवच्चरणे शरणं रक्षार्थं स्थानं प्रविश्य समाश्रित्य जीवितुमिच्छामः। स्वयमसिद्धः कथं परं साधयेदिति। 'शरणं गृह-रक्षित्रोः' ॥१०३॥

1. B1. तथाविधं.

नास्माकमस्मान्मदनापमृत्योस्त्राणाय[1] पीयूषरसायनानि ।

प्रसीद तस्मादधिकं निजं तु प्रयच्छ पातुं रदनच्छदं नः ॥१०४॥

पीयूषमेव रसायनानि बहुवस्तुसंयोगजभेषजविशेषास्तद्रूपत्वात् तानि अस्मान्मदनस्मान्म-
-दनादेव वाऽपमृत्योरकालमरणात् सकाशादस्माकं रक्षणाय न सन्ति । तस्मात् हे वैदर्भि ! प्रसीद, सुधारसादप्यधिकं निजमधरं नोऽस्मभ्यं प्रयच्छ । तस्यापमृत्योः प्रतीकारायेत्यर्थः । तेषां प्रत्येकसन्देशस्य संक्षिप्य कथनादस्माकमिति बहुवचनम् । निजाधरमिति चैक-
-वचनं न विरुध्यते ॥१०४॥

प्लुष्टः स्वैश्चापबाणैरपि[2] सह मकरेणात्मभूः केतुनाऽभू-
-द्दग्धो नस्त्वत्प्रसादादथ मनसिजतां मानसो नन्दनः सन् ।
भ्रूभ्यां ते तन्वि ! धन्वी भवतु तव सितैश्चैत्रभल्लः स्मितैः स्ता-
-दस्तु त्वन्नेत्रचञ्चत्तरशफरयुगाधीनमीनध्वजाढ्यः[3] ॥१०५॥

हे तन्वि ! हि यस्मात् स आत्मभूः कामः स्वैश्चापबाणैः धनुःशरैः सह तथा मकरेण स्वेन केतुना सह प्लुष्टोऽभूद् दग्धः आसीत् । तस्मादथवा तादृशात् प्लोषादनन्तरं तव प्रसादान्नोऽस्माकं मानसो नन्दनः सन् मनोभूतः पुत्रो भवन् । मनसिजतां धत्तां अनया रीत्या मनसिजो भवत्वित्यर्थः । ते तव भ्रूभ्यां कृत्वा धन्वी प्रशस्यचापयुक्तो भवतु । तव सितैः स्मितैः कृत्वा चैत्रभल्लो व्ययनशीलशिलीमुखः स्तात् । तव नेत्रे एव चञ्चत्तरौ अतिचपलौ यौ शफरौ म-[173·ब]-त्स्यौ तयोर्युगं चञ्चत्तरशफरयुगं तस्याधीना आयत्ता मीनध्वज इत्याख्या नाम यस्य स तथा । एवं सर्वेषां दग्धानामत्र सम्भवो मकरस्यैकस्य केतोः स्थाने मत्स्यद्वयमत्र । मकरो जलचरमत्स्योपलक्षणं वा । पूर्वस्मात् स्मरस्य देहादिव्यतिरेकादिदानीं युक्त्या वैशिष्ट्यं गम्यम् । सितानां स्मितानां कुसुमत्वं गुणे गुणिव्यवहारात् । कविसमये लोके च पुष्पाणां सामान्येन शुक्लतैव ॥१०५॥

स्वप्नेन प्रापितायाः प्रतिरजनि तव श्रीषु मज्जः कयाक्षः
श्रोत्रे गीतामृताब्धौ त्वगपि ननु तनुमञ्जरीसौकुमार्ये ।
नासा श्वासाधिवासेऽधरमधुनि रसज्ञा चरित्रेषु चित्तं
तन्नस्तन्व्यङ्गि ! कैश्चिन्न करणहरिणैर्वागुरा लङ्घितासि ॥१०६॥

---

1. B1, D. -रसोऽपि नासौ. 2. B1, D-शैपैः 3. B1, D. -ध्वजाङ्कः

हे तन्वि ! प्रतिरजनि सर्वासु रजनीषु तव श्रीषु तनुकान्तिषु विषये कयाक्षो मग्न इति चक्षुरिन्द्रियमस्माकमित्यत्र गम्यम्। ननु प्रत्यक्षतया संबध्यते। श्रोत्रे श्रुती गीत-मेवामृतं तस्याब्धौ मग्ने इति श्रवणेन्द्रियम्। ननु भो त्वगपि तनूमञ्जरी सौकुमार्य देहवल्लिमार्दवे मग्ना इति त्वगिन्द्रियम्। नासा श्वासाधिवासे मुखपवनसौरभे मग्ना इति घ्राणेन्द्रियम्। अधर एव मधु, तस्मिन् रसज्ञा जिह्वा मग्ना इति रसनेन्द्रियम्। चरित्रेषु शीलेषु चित्तं मग्नम्। तवेति सर्वत्र संबन्धः। मग्न इत्यात्रार्थवशाद् विभक्तिविपरिणामः। तत् कारणात् त्वं नोऽस्माकं कैश्चिद् पूर्वैः करणैरेव हरिणैर्मृगैर्वागुरा मृगबन्धिनी न लङ्घितासि। अपि त्वस्माकं बाह्यैरिन्द्रियैरान्तरैश्च वागुरेवाक्रान्ता वर्तसे। हरिणा हि यूथपानुगामिन एकैकं क्रमेण व्याकुलाः प्रकीर्णाः सन्तो वा सम्भूय वागुरां लङ्घयन्ति। अत्र तु मनस एव यूथपत्वं लङ्घितुमारब्धा लङ्घिता। वागुरायां लङ्घितुमारब्धायामवश्यं पत्यते, दुर्ल-ङ्घ्यत्वात् तस्याः। अत एव कूपविपुलखातिकादिलङ्घनं नीतिशास्त्रेषु निषिद्धम्। तत् लङ्घनाद् हि सिद्धिर्नास्त्येव ॥१०६॥

इति धृतसुरसार्थवाचिकस्रग्निजरसनातलपत्रहारकस्य।

सफलय मम दूततां वृणीष्व स्वयमवधार्य दिगीशमेकमेषु ॥१०७॥

हे भैमि! मम दूततां सफलां कुरु। एषु चतुर्षु मध्ये तु भूयो भूयो विमृश्य विचार्य, एकं दिगीशं वृणीष्व, वरय। त्वयैवं कृते हि मम दूत्यं सफलं भवेत्। कीदृशस्य मम। इत्येतादृशी धृता स्वीकृता सुरसार्थस्य देवचतुष्टयस्य वाचिकस्रक् सन्देश-[1]वाक्यमुक्तयो येन तदेवंभूतं यन्निजं रसनातलं तदेव पत्रं भूर्जं, तस्य हारकस्य प्रापकस्य। धृता अवस्थिताः सुरसार्थवाचिकस्रजो यत्रेति वा ॥१०७॥ [173.6]

आनन्दयेन्द्रमथ मन्मथमग्नमग्निं केलीभिरुद्धर तनूदरि नूतनाभिः।

आसादयोदितदयं शमने मनो वा नो वा यदीत्थमथ तद्वरुणं वृणीष्व[2] ॥१०८॥

हे तनूदरि! इन्द्रमानन्दय हर्षय, अर्थाद् वरणेन। अथवा मन्मथे मग्नमग्निं स्मरा-धीनं नूतनाभिः केलीभिः कृत्वा उद्धर, निष्कासय। अन्योऽपि जलकर्दमादिमग्न उद्ध्रियते। अथवा शमने यमे विषये उदितदयं, सञ्जातकरुणं सत्, मन आसादय, प्रापय, आसन्नं कुरु। वाऽथवा यदि नेत्थं एवं पूर्वो यदि नास्ति, तर्हि वरुणं वृणीष्व ॥१०८॥

1. B1 वाक्योक्तयो. 2. B वृणीथाः.

श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
तस्यागादयमष्टमः कविकुलादृष्टाध्वपान्थे महा-
-काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥१०९॥
कविकुलैरदृष्टस्याध्वनो मार्गस्य पान्थः पथिकस्तस्मिन्निति शुभम् ॥१०९॥.

शाण्डिल्यनाममुनिवंशकरीरकस्य,
श्रीधीरधीरतनयस्य गदाधरस्य।
क्लृप्तौ सुधामधुनि नैषधदीपिकायां
सर्गोऽयमष्टम इति प्रतिपूर्यते स्म॥१॥.

शुभं भवतु। इति श्रीनैषधकाव्ये गदाधरीदीपिकायामष्टमः सर्गः सम्पूर्णता-
-मवीभजत्, सद्गुरूणां प्रसादोदयतः।

॥श्रीमन्नृसिंहाय नमः ॥ ॐ क्ष्रौं ॐ ॥